भा० द० ५० १

ॐश्रीगणेशायनमः॥ ततःपंचाशतमेतत्रणसंख्यभयादिव कारयित्वाम्बुधौदुर्गंतत्रनिनायनिजंजनं॥१
कपटात्कपटैरेवहन्ताद्दैत्याननयत्ततः अजयच्चजरासंधंधर्मेलौकिकतात्त्विके २ अस्तिप्राप्तिसंज्ञकेद्वे
तेःजग्मतुः १ कंसेशोकःकृत्स्नेऽमर्षःतापांयुतः ३ न्यरुणत्तरुवेद ४ तस्यबलंसैन्यंउद्वेलंवे
ष्टितमर्यादंसागरमिवतेनतस्यबलेनसंरुद्धं ५ किंबलमेवहन्मिनमागधं मागधंवाहत्वाबलंरक्षा

श्रीशुकउवाच॥ अस्तिःप्राप्तिश्चकंसस्यमहिष्यौभरतर्षभ मृतेभर्तरिदुःखार्तेईयतुःस्मपितुर्गृ।
हान् १ पित्रेमगधराजायजरासंधायदुःखिते वेदयांचक्रतुःसर्वमात्मवैधव्यकारणं २ सत
दप्रियमाकर्ण्यशोकामर्षयुतोनृप अयादवींमहींकर्तुंचक्रेपरममुद्यमं ३ अक्षौहिणी।
भिर्विंशत्यातिसृभिश्चापिसंवृतः यदुराजधानींमथुरांन्यरुणत्सर्वतोदिशं ४ निरीक्ष्य
तद्बलंकृष्णउद्वेलमिवसागरं स्वपुरंतेनसंरुद्धंस्वजनंचभयाकुलं ५ चिंतयामासभगवान्
हरिःकारणमानुषः तद्देशकालानुगुणंस्वावतारप्रयोजनं ६ हनिष्यामिबलंह्येतद्भु
विभारंसमाहितं मागधेनसमानीतंवश्यानांसर्वभूभुजां ७ अक्षौहिणीभिःसंख्यातंभटा
श्वरथकुंजरैः मागधस्तुनहंतव्योभूयःकर्ताबलोद्यमं ८

मि यद्वासमागधंसर्वंहन्मीतिचिंतयामासतत्रप्रथमंकर्तव्यंतेष्वामीत्येवंचिंतयितुमशक्तत्राह का
रणमानुषइति भूभारावतारकारणेनमानुषः नतत्त्वतइति एवंद्वेधाविचिन्त्यप्रथमंमहंतनिर्धारि।
तवान् ६॥तदाह चतुर्भिः हनिष्यामीति ७ बलोद्यमंकरिष्यति ८ ॥

नन्वनपवहं नयस्तत्राह एतदर्थमिति एतत्कृत्यार्थं सम्प्रयति भूभारहरणायेति ९ अयमेतद
र्थोऽवतारस्तस्य पलक्षणमित्याह अन्योपीति प्रभवतः उद्भवतः १० ससूतौ सारथिसहितौ परि
च्छदः परिकरः ध्वजकवचादिः तत्सहितौ ११ १२ तेनाथो वियते येषां ते नावेतस्ते षाटशितौ वद्ध

एतदर्थोऽवतारोऽयं भूभारहरणाय मे संरक्षणाय साधूनां कृतोऽन्येषां वधाय च ९ अन्योपि धर्मरक्षा
यै देहः संध्रियते मया विरामायाप्यधर्मस्य काले प्रभवतः क्वचित् १० एवं ध्यायति गोविंदे आ
काशात्सूर्यवर्चसौ रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ ११ आयुधानि च दिव्यानि पुरा
णानि यदृच्छया दृष्ट्वा तानि हृषीकेशः संकर्षणमथाब्रवीत् १२ ॥श्रीभगवानुवाच॥ पश्या
र्यव्यसनं प्राप्तं यदूनां त्वावतां प्रभो एष ते रथ आयातो दयितान्यायुधानि च १३ यानमास्था
य जह्येतद्व्यसनात्स्वान्समुद्धर एतदर्थं हि नौ जन्म साधूनामीश शर्मकृत् १४ त्रयोविंशत्य
नीकाख्यं भूमेर्भारमपाकुरु एवं संमंत्र्य दाशार्हौ दंशितौ रथिनौ पुरात् १५ निर्जग्मतुः स्वा
युधाढ्यौ बलेनाल्पीयसा वृतौ शंखं दध्मौ विनिर्गत्य हरिर्दारुकसारथिः १६ ततोऽभूत्परा
सैन्यानां हृदि वित्रासवेपथुः तावाह मागधो वीक्ष्य हे कृष्ण पुरुषाधम १७ न त्वया योद्धुमि

कवचौ स्वायुधाढ्यौ शोभनायुधसंपन्नौ १५ १६ पुरुषाधमेत्यधमाय स्मादिति वा स्तवोऽर्थः हे पुरुषोत्तमे
ति १७ एतेन सर्वोत्तरत्वात्स्वेनाननुशेण हे अमंदत्व भ्रातीति वपुरवियानांहे तीतितया हे अवि।

भा० दं० ५०

ग्रह्णेयदेहोसावितिस्वयमेवसत्तापरितोषात्पदांतरमाह यद्वामांजहीति १९ यथाश्रुतार्थग्रहणेन।
भगवतउत्तरंनवैशूराविकत्थंतेश्लाघंते २० माधवौमधुवंशसंभवौ महताबलेनसमूहेनावृणोत्।
वायुरभ्रैःसूर्यंरेणुभिश्चाग्निंयथैतस्यदर्शनमात्रमेवावरणमितिसूचितं २१ २२ परस्यानीकानिसे।
न्यानितान्येवपयोमुचोमेघास्तेषांशिलीमुखावाणाःतेषामत्युल्बणंवर्षंतेनपीडितंव्यस्फूर्जयतउ

स १

तवरामयदिश्रद्धायुध्यस्वधैर्यमावह हित्वावामच्छरैःछिन्नंदेहंस्वर्याहिमांजहि १९ ॥श्रीभगवा
नुवाच॥ नवैशूराविकत्थंतेदर्शयंत्येवपौरुषं नगृह्णीमोवचोराजन्नातुरस्यमुमूर्षतः २०
जरासुतस्तावभिसृत्यमाधवौमहाबलौघेनबलीयसावृणोत् ससैन्ययानध्वजवाजिसारथीसू
र्यानलौवायुरिवाभ्ररेणुभिः २१ सुपर्णतालध्वजचिह्नितौरथावलक्षयंत्योहरिरामयोर्मृधे।
स्त्रियःपुराट्टालकहर्म्यगोपुरंसमाश्रिताःसंमुमुहुःशुचार्दिताः २२ हरिःपरानीकपयोमुचां
मुहुःशिलीमुखात्युल्बणवर्षपीडितं स्वसैन्यमालोक्यसुरासुरार्चितंव्यस्फूर्जयच्छार्ङ्गशरास
नोत्तमं २३ गृह्णन्निषंगादथसंदधच्छरान्विकृष्यमुंचन्शितबाणपूगान् निघ्नन्रथान्कुंजर
वाजिपत्तीन्निरंतरंयद्वदलातचक्रं २४ निर्भिन्नकुंभाःकरिणोनिपेतुरनेकशोश्वाःशरवृ।

परानीकपः छिन्नमसौक्तिकैर्यपाः २४

कालिकयाः रथाङ्गताश्वध्वजतानायकाः

त्तंभितवान् २३ गृह्णन्निति निषंगादिषुधेःशरान्गृह्णन्नथसंधानंसंदधत् गुणमाकृ
ष्यनिशितबाणसमूहान्मुंचन्निघ्नन्प्रहरन्वपत्तिः यद्वतिःनिरंतरमितिग्रहणादिक्रियाविशेषणं
ज्वलत्काष्ठभ्रमणेयथाचक्रवद्भवतितद्वद्व्यस्फूर्जयदिति २४ हताःअश्वाःध्वजाःसन्नानायकारथि

२२

टीका २

संछिद्यमानाद्विपदाश्च भाः वाजिनश्च तेषामंगेभ्यः प्रसूताः असृगापगाः रुधिरनद्यः परस्परं प्रवर्तिता इति तृतीयेनान्वयः प्रसिद्धनदीरूपकमाह भुजा एव अहयो यासु ताः पुरुषाणां शीर्षाण्येव कच्छपा यासु ताः हताश्विपा एव द्वीपा अन्तर्वर्तिनदानि तथा हया एव ग्रहाः ग्राहास्तैश्चाकुला आसाः २६ करा ऊरवश्च मीना यासु ताः नराणां केशा एव शैवला यासु ताः धनूंष्येव तरंगा आयुधान्येव गुल्मा तैश्च संकुलाः अच्छुरिकाश्चर्माणि चक्राणि वा तान्येवावर्ताः तैर्भयानकाः महामणि-

संछिद्यमानद्विपदेभवाजिनामंगप्रसूताः शतशोऽसृगापगाः। भुजाहयः पूरुषशीर्षकच्छपा।
हताश्विपद्वीपहयग्रहाकुलाः २६ करोरुमीना नरकेशशैवला धनुस्तरंगायुधगुल्मसंकुलाः
अच्छुरिकावर्तभयानका महामणिप्रवेकाभरणाश्मशर्कराः २७ प्रवर्तिता भीरुभयावहा मृ-
धे मनस्विनां हर्षकरीः परस्परं विनिघ्नतारीन्मुशलेन दुर्मदान्संकर्षणेनापरिमेयतेजसा २८
बलेन तं मार्गणवर्गभैरवं दुरन्तपारं मगधेन्द्रपालितं तयं प्रणीतं वसुदेवपुत्रयोर्विक्रीडितं तज्ज-
गदीशयोः परं २९

-प्रवेका उत्तमाः आभरणानि च यथायथं अश्मानः शर्कराश्च यासु ताः २७ भीरूणां भयावहाः म-
नस्विनां हर्षकर्यः २८ किंच संकर्षणेनापि तद्बलं तयं प्रणीतं अगाधे रणार्णवे वनदुर्गे दु-
र्गमं भयानकं च यतः दुरन्तपारं अन्तोऽन्तलं पारमवधिः दुःप्राप्तो निषेधे विक्रमेणागाधं दे-
शतश्च निरवधिकमित्यर्थः किंच मगधेन्द्रेण च पालितं बलं यदेवंभूतं तद्रामकृष्णयोः कर्मणि
तत्परं केवलं तयोर्विक्रीडितं न तु पराक्रमः २९ ॥

दे॰ ऊ॰ ३

नचैतदाश्चर्यमित्याह स्थित्युद्भवांतमिति तर्हि किमित्याश्चर्यमिव वर्णितं तत्राह तथापीति मर्त्यानुविधतेऽनुकरोतीति मर्त्यानुविधस्तस्य १० किंच तयाहेति हतान्यनीकानि यस्य अवशिष्टं अस्य वपुषस्तेच तेच ११ हतावकृष्टाः अरातयो येन तत्त्वाश्रतमपि जरासंधं वध्यमानं वारयामास १२ पवित्रार्थानि यश्मोपदेशनपराणि यदा नियेषु तैर्वाक्यैः नयनैश्चेति तिभिः प्राकृतैर्लौकिकैः तत्र लोति

स्थित्युद्भवांतं भुवनत्रयस्य यः समीहतेऽनंतगुणः स्वलीलया नतस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते १ जग्राह विरथं रामो जरासंधं महाबलं हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा ११ बध्यमानं हतारातिं पाशैर्वारुणमानुषैः वारयामास गोविंदस्तेन कार्यचिकीर्षया १२ सा मुक्तो लोकनाथाभ्यां व्रीडितो वीरसंमतः तपसे कृतसंकल्पो वारितः पथि राजभिः १३ वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतैरपि स्वकर्मबंधनप्राप्तो यदुभिस्ते पराभवः १४ **॥ श्रीशुक उवाच ॥** हतेषु सर्वानीकेषु नृपो बार्हद्रथस्तदा उपेक्षितो भगवता मगधान्दुर्मना ययौ १५ मुकुंदोऽप्यक्षतबलो निस्तीर्णारिबलार्णवः विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः १६

किंकर्त्व्यायमाहुः स्वकर्मेति यदुभिरल्पकैः कृतात्ते महतः पराभवः केवलं कर्मबंधनेन प्राप्तः अतस्त्वया न लज्जितव्यमिति १४ बार्हद्रथो जरासंधः १५ मुकुंदोपि यथाविस्पत्नं षणाः न हतं बलं यस्य सः तस्यैवाश्रतदेहस्यातन्नप्रतिसंधानादिति भावः निस्तीर्णः अनायासेनैव नीर्णोऽरिबलार्णवो

प्रत्युपययौ नेमं पुरवासिभिर्जनैरभिसंगम्य मिलितानतदा च प्रभौ पुरं प्रविशति सति शंखादयो नेदुः ३८
कथंभूतं पुरं तदाह सिक्तमार्गामिति ब्रह्मघोषेण निर्घुष्टां निनादितां कौतुकेन उत्सवेन आसर्व-
तोवद्धानि तोरणानि यस्यां तां ३९ निचीयमानः विकीर्यमाणः प्रविवेशेति विपरिणतानुषंगः ४० आ

माथुरैरुपसंगम्य विज्वरैर्मुदितात्मभिः उपगीयमानविजयः सूतमागधवंदिभिः ३७ शंखदुंदु-
भयो नेदुर्भेरीतूर्याण्यनेकशः वीणावेणुमृदंगानि पुरं प्रविशति प्रभौ ३८ सिक्तमार्गां हृष्टजनां
पताकाभिरलंकृतां निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणां ३९ निचीयमानो नारीभिर्माल्य-
दध्यक्षतांकुरैः निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः ४० आयोधनगतं वित्तमनंतं वी-
रभूषणं यदुराजाय तत्सर्वमाहृतं प्रादिशत्प्रभुः ४१ एवं सप्तदशकृत्वस्तावत्यक्षौहिणीबलः
युयुधे मागधो राजा यदुभिः कृष्णपालितैः ४२ अक्षिण्वंस्तद्बलं सर्वं वृष्णयः कृष्णतेजसा
हतेषु स्वेषु सैन्येषु त्यक्तोऽगादरिभिर्नृप ४३ अष्टादशमसंग्राम आगामिनि तदंतरा नारदप्रेषि-
तो वीरो यवनः प्रत्यदृश्यत ४४ रुरोध मथुरामेत्य तिसृभिर्म्लेच्छकोटिभिः नृलोके चाप्रतिद्वं-
द्वो वृष्णीन् श्रुत्वात्मसंमितान् ४५ तं दृष्ट्वाचिंतयत्कृष्णः संकर्षणसहायवान् अहो यदूनां वृ-

योधने रणाभूमिस्तत्रस्थे वित्ते वीराणां भूषणानां वतिरुत्तिछेदः तावति परजयेव तंमाने पि अक्षौहि-
णीपि वलं यस्य सः सप्तदशकृत्वः सप्तदशवारान् युयुधे ४१ ४२ अक्षिण्वन् क्षयं निन्युः ४३ अष्टा-
दशमे अष्टादशे संग्रामे भाव्ये तन्मध्ये अकस्मात्कालयवनः प्राप्तः ४४ आत्मसंमितान् स्वतुल्यान्

जिनं प्राप्तं ह्युभयतो महत् ४६

४५ वृजिनं दुःखमुभयतः यवनाज्जरासंधाच्च ४६

भा॰ ट॰ ३ ५

तदाह हयेन निहंयेनिरूणाद्दि ५७ ग्रस्यग्रतेन ५८ ५९ समद्रमध्येदुर्गं तन्मध्येनगरं कृत्स्नाद्भुते
सर्वोपस्कृयमयंग्रचीकरत्कारयामास ५० तष्टाविश्वकर्मा तदीयंशिल्पनैपुणं चक्रियाकौशले तदा।
हर्म्याहैर्स्त्रिभिः रथ्याति रथ्याराजमार्गाः पुरतः वीथ्यः उपमार्गाः यस्मिंस्तः उभयतो पिवनराएणा।
तानितन्मध्ये कोष्ठाः ततोप्यन्तः सर्वसभवनानि तदुपरि स्फाटिकाद्दालिकाः तदुपरि हेमकुंभा इति
वहुभूमिकेयथावास्तरहादिनिर्माणस्थानेतत्तत्न तिक्रम्यविनिर्मिते ५१ सुराणां दुर्माललनाग्रये

यवनोयं निहंयेस्मानग्रघतावन्महाबलः मागधोप्ययवाप्योवापरमोवागमिष्यति ५७ ग्रा
वयोर्युध्यतोरस्य यघागंताजरासुतः बेधून्वयिष्यत्ययवानेष्यतेस्वपुरं वली ५८ तस्मादद्य
विधास्यामोदुर्गं द्विपदर्दुर्गमं तत्रज्ञातीन्समाधाययवनं घातयामहे ५९ इतिसंमंत्र्यभगवा
नदुर्गं द्वादशयोजनं अंतः समुद्रेनगरेकृत्स्नाद्भुतमचीकरत ५० दृश्यतेयत्रहित्वाष्ट्रविज्ञा
नंशिल्पनैपुणं रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मिते ५१ सुरद्रुमलतोद्यानविचित्रोप
वनान्विते हेमश्रृंगैर्दिविस्पृग्भिः स्फाटिकाद्दालगोपुरैः ५२ राजतारकुटैः कोष्ठैर्हेमकुंभैरा।
लंकृतैः रत्नकूटैर्गृहैर्हेमैर्महामरकतस्थलैः ५३

उद्यानानि विविचित्रोपवनानि चैतैरन्वि
तं हेममयानि श्रृंगाणि येषां तैः दिविस्पृग्भिः ग्रत्युच्चैः स्फाटिकाग्रट्टालाउपरिभूमिकाः गोपुराणि।
चद्वाराणि तैर्निर्मितमित्युत्तरेणान्वयः ५२ राजतारकुटैः रजतं च ग्रारकूटं च पीतलोहं ताभ्यां निर्मि
तैः कोष्ठैः ग्रश्वशालाः त्र्यशालादिभिः कर्थभूतैः हेमकुंभैरलंकृतैः तथा रत्नकूटैः पद्मरागादिभि

किंच नगरगृहादीनां वास्तोष्पतीनां देवानांच वलभीभिश्चन्द्रशालिकादिभिश्च निर्मितं यदुदेवगृहैरा
जगृहैरुल्लसत्शोभमानं ५४ पारिजातंच प्राहिणोत्प्रस्थापयामासेति सुधर्मामपीतिसंबंधात्सर्वभावि
त्वात्भूतनिर्देशः मर्त्यधर्मैः क्षुत्पिपासादिषडूर्मिभिः ५५ निधिपतिःकुबेरः अष्टौकोशान्निधीन् प
द्मश्चैवमहापद्मोमत्स्यकूर्मौतथोदकः नीलोमुकुंदःशंखश्चनिधयोष्टौप्रकीर्तिताः इतिप्रसिद्धान् नि

वास्तोष्पतीनांचगृहैर्वल्लभीभिश्चनिर्मितैः चातुर्वर्ण्यजनाकीर्णंयदुदेवगृहोल्लसत् ५४ सुधा
र्मांपारिजातंचमहेंद्रःप्राहिणोद्धरेः यत्रचावस्थितोमर्त्योमर्त्यधर्मैर्नयुज्यते ५५ श्यामैकक
र्णान्वरुणोहयान्शुक्लान्मनोजवान् अष्टौनिधिपतिःकोशाल्लोकपालोनिजोदयान्
५६ यद्यद्भगवतादत्तमाधिपत्यंस्वसिद्धये सर्वंप्रत्यर्पयामासुर्हरौभूमिगतेनृप तत्रयोगप्र
भावेननीत्वासर्वजनंहरिः ५७ प्रजापालेनरामेणकृष्णःसमनुमंत्रितः निर्जगामपुरद्वारा
त्पद्ममालीनिरायुधः ५८ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचाशत्तमोध्यायः ॥

जोदयान् निजविभूतीः ५६ अन्येचसिद्धादयोभगवतास्वाधिकारसिद्धये यद्यदाधिपत्यंदत्तमासीत्त
त्सर्वंप्रत्यर्पयामासुरिति ५७ यथाकालयवनोनवेत्ति नचासौजनः तथायोगप्रभावेननीत्वातमत्र
स्थित्वाप्रजाःपालय अहंपलायिष्य इतिसमनुमंत्रितःकृतानुमंत्र इति ५८ दशमेपंचाशत्तमः ॥
॥ ॥ ॥ ॥

भा०
द०
५

एकपंचाशत्तमे हन्त मुचुकुंददृशा हरिः यवनं मुचुकुंदेन स्तुतः सन्नन्वकंपत १ यवनेंद्रस्य काल
यवनाद्युद्भीषणात् हरिर्हरगिरः स्वैरपालनायापलायत २ यदा गार्ग्यः श्यालेन षंढ इत्युक्तः सभा-
यां यादवैरुपहसितः क्रुद्धोसौ श्रीमहेशप्रसादाद्यदुभीषणं पुत्रं वरं लब्धवान् ततश्च यवनेंद्रेणापुत्रे-
ण स्वक्षेत्रे पुत्रोत्पादनाय प्रार्थितो गार्ग्यः कालयवनमजीजनदिति पुराणप्रसिद्धं पुरद्वाराद्विनिःक्रांत

श्रीशुक उवाच ॥ तं विलोक्य विनिःक्रांतमुज्जिहानमिवोडुपं दर्शनीयतमं श्यामं पीतकौशे
यवाससं १ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणं
२ नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितं मुखारविंदं बिभ्राणं स्फुरन्मकरकुंडलं ३
वासुदेवो ह्ययमिति पुमान् श्रीवत्सलांछनः चतुर्भुजोरविंदाक्षो वनमाल्यतिसुंदरः ४ ल
क्षणैर्नारदप्रोक्तैर्नान्यो भवितुमर्हति निरायुधश्चलन्पद्भ्यां योत्स्येनेन निरायुधः ५ इति नि
श्चित्य यवनः प्राद्रवंतं पराङ्मुखं अन्वधावज्जिघृक्षुस्तं दुरापमपि योगिनां ६ हस्तप्राप्तमिवा
त्मानं हरिणा स पदे पदे नीतो दर्शयता दूरं यवनेशोद्रिकंदरं ७ ॥

उज्जिहानमुद्गच्छंतं १ २ नित्यप्रमुदितमित्यादि मुखारविंदविशेषणं ३ ४ नारदोक्तैर्लक्षणैरयं पु
मान् वासुदेव एव नान्यो भवितुमर्हति अयं निरायुधः अतोनेन पद्भ्यामेव चलन्निरायुधोहं योत्स्या
मि ५ ६ इति निश्चित्य पराङ्मुखं प्राद्रवंतमन्वधावदित्यन्वयः ७ ॥ ५

आत्मानं हन्तुमागतं दर्शयन् आहूतं नीत इत्यन्वयः अहताशुभः अक्षीणकर्मा ८ ९ तेशयानमच्युतं
मत्वाअताडयदिति १० ११ तस्य क्रुद्धस्य दृष्टिपातेन संदीप्तो यः स्वदेहजो ग्निस्तेन १२ यवनमर्दय
तिहिनस्तीति तथा सकस्य वंश्यः किंवीर्यः कीदृक्प्रभाववान् किंतेजः कस्य वीर्यं पुत्र इत्यर्थः

पलायनं यदुकुले जातस्य तव नोचितं इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ८ एवं क्षिप्तो
पि भगवान्प्राविशद्गिरिकंदरं सोपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरं ननु सौ दूरमानीय शेते
मामिह साधुवत् ९ इति मत्वाच्युतं मूढस्तं पदा समताडयत् स उत्थाय चिरं सुप्तः शनैरुन्मील्य
लोचने १० दिशो विलोकयन्पार्श्वे तमद्राक्षीदवस्थितं स तावत्तस्य रुष्टस्य दृष्टिपातेन भारत ११
देहजेनाग्निना दग्धो भस्मसादभवत्क्षणात् ॥राजोवाच॥ को नाम स पुमान्ब्रह्मन्कस्य किंवीर्य एव
वा कस्माद्गुहां गतः शिष्ये किंतेजो यवनार्दनः १२ ॥श्रीशुक उवाच॥ स इक्ष्वाकुकुले जातो मां
धातृतनयो महान् मुचुकुंद इति ख्यातो ब्रह्मण्यः सत्यसंगरः १३ स याचितः सुरगणैरिंद्राद्यैरा
त्मरक्षणे असुरेभ्यः परित्रस्तैस्तद्रक्षां सो करोच्चिरं १४ लब्ध्वा गुहं ते स्वःपालं मुचुकुंदमथा
ब्रुवन् राजन्विरमतां कृच्छ्राद्भवान्नः परिपालनात् १५ नरलोकं परित्यज्य राज्यं निहतकंट
कं अस्मान्पालयतो वीर कामास्ते सर्व उज्झिताः १६ सुता महिष्यो भवतो ज्ञातयो मात्यमंत्रि
णः प्रजाश्च तुल्यकालीया नाधुना संति कालिताः १७

शिष्ये स्वपिति १३ सत्यः संगरो युद्धं प्रतिज्ञा वा यस्य सः १४ १५ गुहे कार्तिकेये स्वःपालं स्वर्गपा
लकं सेनान्यं १६ उज्झितास्त्यक्ता गता इत्यर्थः १७

भा० ५१

किंच सनाइति तत्यकालीयाः तत्समानकालीनाः कालिताः विचालिताः १८ मत्प्रजाः कोन्यः।
कालयेदितिचेदतआहुः कालइति कालयतेइत्यत्रकालयति १९ तस्यकैवल्यस्य २० गुहा

कालोबलीयान्बलिनांभगवानीश्वरोव्ययः प्रजाःकालयतेक्रीडन्पशुपालोयथापशू
न् १९ वरंवृणीष्वभद्रंतेऋतेकैवल्यमद्यनः एकएवेश्वरस्तस्यभगवान्विस्वरव्ययः २० ए
वमुक्तः सवैदेवानभिवंद्यमहायशाः अशयिष्टगुहाविष्टोनिद्रयादेवदत्तया २१ यःक
श्चिन्ममनिद्रायाभंगंकुर्यात्सुरोत्तमाः सोपिभस्मीभवेदाशुतथोक्तममरैस्तदा २२ यवना
नेभस्मसान्नीतेभगवान्सात्वतर्षभः आत्मानंदर्शयामासमुचुकुंदायधीमते २३ तमालो
क्यघनश्यामंपीतकौशेयवाससं श्रीवत्सवक्षसंभ्राजत्कौस्तुभेनविराजितं २४ चतुर्भुजं
रोचमानंवैजयंत्याचमालया चारुप्रसन्नवदनंस्फुरन्मकरकुंडलं २५ प्रेक्षणीयंनृलोकस्य
सानुरागस्मितेक्षणं अपीच्यवयसंमत्तमृगेंद्रोदारविक्रमं २६ पर्यपृच्छन्महाबुद्धिस्तेजसा
तस्यधर्षितः शंकितःशनकैराजादुर्धर्षमिवतेजसा २७ ॥मुचुकुंदउवाच॥ कोभवानिहसं
प्राप्तोविपिनेगिरिगह्वरे पद्भ्यांपद्मपलाशाभ्यांविचरस्युरुकंटके २८ किंस्वित्तेजस्विनां
तेजोभगवान्वाविभावसुः सूर्यःसोमोमहेंद्रोवालोकपालोपरोपिवा २९

यांप्रविष्टःशेतेस्म २१ धर्षितः अभिभूतः दुर्धर्षं अप्रधृष्यं २७ विपिने अरण्ये तत्रापि गिरेर्गह्वरे
दुःप्रवेशस्थाने तत्रापि उरुकंटके पद्मपलाशसदृशाभ्यां पद्भ्यां विचरसीति २८ तेजःस्फूर्तिः
प्रभावोदीप्तिर्वा २९ ॥

६

सर्वत्रापरितोषादाह मन्य इति पुरुषर्षभं श्रीविस्तु महाख्यातं श्रेतस्तमः २८ वयंत्विति वर्णा
भिप्रायेणावहुवचनं तेष्वहं मुचुकुंद इति प्रोक्त इति युवनाश्वो मांधातानः पिता ३० ३१ ३२ ३३ ३४ क्व

मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभं यद्बाधसे गुहाध्वांतं प्रदीपः प्रभया यथा २८ शुश्रूष
तामव्यलीकमस्माकं नरपुंगव स्वजन्मकर्मगोत्रं वा कथ्यतां यदि रोचते २९ वयं तु पुरुषा
व्याघ्र ऐक्ष्वाकाः क्षत्रबंधवः मुचुकुंद इति प्रोक्तो यौवनाश्वात्मजः प्रभो ३० चिरप्रजागरश्रां
तो निद्रयोपहतेंद्रियः शयेऽस्मिन्निर्जने कामं केनाप्युत्थापितोऽधुना ३१ सोऽपि भस्मीकृतो नू
नमात्मीयेनैव पाप्मना अनंतरं भवान् श्रीमान् लक्षितोऽमित्रशातनः ३२ तेजसा तेऽविष
ह्येण भूरि द्रष्टुं न शक्नुमः हतौजसो महाभाग माननीयोऽसि देहिनां ३३ एवं संभाषितो रा
ज्ञा भगवान् भूतभावनः प्रत्याह प्रहसन्वाण्या मेघनादगभीरया ३४ ॥श्रीभगवानुवाच॥ ज
न्मकर्माभिधानानि संति मेंऽग सहस्रशः न शक्यंतेऽनुसंख्यातुमनंतत्वान्मयापि हि ३५ क्व
चिद्रजांसि विममे पार्थिवान्युरुजन्मभिः गुणकर्माभिधानानि न मे जन्मानि कर्हिचित् ३६
कालत्रयोपपन्नानि जन्मकर्माणि मे नृप अनुक्रमंतो नैवांतं गच्छंति परमर्षयः ३७ त
थाप्यद्यतनान्यंग शृणुष्व गदतो मम विज्ञापितो विरिंचेन पुराहं धर्मगुप्तये ३८

क्वचित्कदाचित्कश्चिद्यद्यपि रजांस्यपि विममे गणितवान् तथापि न जन्मानि कर्माणि विमिमीते ३५ ३६

भा० द० ८

तेतिग्मचक्षुषानिमित्तेनमयैवदग्धः ४१ अनुग्रहोहमितिशोचितुं यद्वाअन्यैर्दत्तेषुत्वदीयमानेषुयथा
शोचन्तितेनैवंमांप्रपन्नः मद्दत्तवराणामक्षयत्वादितिभावः ४२ अष्टाविंशतिमेयुगेभगवाननवतरिष्यती
तिवृद्धगर्गवाक्यमनुस्मरन्नित्यर्थः ४४ तद्भक्तिरेवकेवलेऽर्थलाभाकामांस्त्यक्त्वाज्ञानवराण्योग्यान्या

समेभागधेयमाणानामसुराणांत्वयायच अवतीर्णोयदुकुलेगृहआनकदुन्दुभेः ३९ वदं
तिवासुदेवेतिवसुदेवसुतंहिमां कालनेमिर्हतःकंसःप्रलंबाद्याश्चसद्विषः ४० अयंच
यवनोदग्धोराजंस्तेतिग्मचक्षुषा सोहंतवानुग्रहार्थंगुहामेतामुपागतः ४१ प्रार्थितःप्र
चुरंपूर्वंत्वयाहंभक्तवत्सलः वरान्वृणीष्वराजर्षेसर्वान्कामान्ददामिते ४२ मांप्रपन्नोज
नःकश्चिन्नभूयोर्हतिशोचितुं ॥श्रीशुकउवाच॥इत्युक्तस्तंप्रणम्याहमुचुकुंदोमुदान्वि
तः ४३ ज्ञात्वानारायणंदेवंगर्गवाक्यमनुस्मरन् ४४ मुचुकुंदउवाच॥विमोहितोयंज
नईशमाययात्वदीययात्वांनभजत्यनर्थदृक् सुखायदुःखप्रभवेषुसज्जतेगृहेषुयोषित्पु
रुषश्चवंचितः ४५

प्रायेणअभक्तानांसंसारमनुभिःप्रपंचयन्स्तौति विमोहितोयमिति हेईशयोयोषित्पुरुषश्च
तिहिवियोग्यपिजनस्त्वदीययामाययाविमोहिताः अनर्थदृक् अर्थेपरमार्थसत्वेनानर्थपश्यती
तितथा अतस्त्वांनभजतिकिंतुपरस्परंवंचितःसन्सुखेच्छयादुःखानामेवप्रभवोयेषुतेषुगृहे।

॥ ११२ ॥

किंच कामसुखं सूकरादिष्वपि संभवति भगवद्भजनं तु न मानुषव्यतिरेकेणेति मानुषत्वं श्लाघ्यं त्वामभजन्तं निन्दत्याह लब्ध्वेति अत्र कर्मभूमौ अव्यंगं अविकलांगं किंच असति विषयसुखे मतिर्यस्य सः गृहमेवान्धकूपस्तस्मिन्पतितः यथा पशुस्तृणलुब्धोऽन्धकूपे पततीति ४५ न केवलमस्य जनस्यैवं गतिः किंतु ममापि तथैवेत्याह ममेति मर्त्ये शरीरे आत्मबुद्धिर्यस्य अत एव सुतादिष्वासज्जमानस्य ४६ उन्नद्धमदत्वं प्रपंचयति कलेवर इति घटकुड्यादिसदृशे देहे आत्मनि

लब्ध्वा जनो दुर्लभमत्र मानुषं कथंचिदव्यंगमयत्नतोऽनघ पादारविंदं न भजत्यसन्मतिर्गृहांधकूपे पतितो यथा पशुः ४५ ममैष कालोऽजित निःफलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः मर्त्यात्मबुद्धेः सुतदारकोशभूष्वासज्जमानस्य दुरंतचिंतया ४६ कलेवरेऽस्मिन्घटकुड्यसंनिभे निरूढमानो नरदेव इत्यहं वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वागणयन्सुदुर्मदः ४७ प्रमत्तमुच्चैरिति कृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहि

नरदेवं सुदुर्मदस्यासं अतो ममैष कालो निःफलो गत इति ४७ त्वामगणयं तत्त्वमाक्रामसीत्याह प्रमत्तमिति प्रमत्ते अनवहिते त्वामंतकमविगणय्य देहादिष्वासक्तमिति यावत् उच्चैः प्रमत्त इति कृत्यचिंतया एवमेवं करणीयमिति मनोरथपरंपरया मनोरथे भग्नेऽपि विषयेषु लालसं उत्सुकं प्राप्तेऽपि पुनः प्रवृद्धो लोभस्तृष्णा यस्य तं अंतकस्त्वमभिपद्यसे अभिभवसीत्यर्थः यथा क्षुत्क्षीणो लेलिहानोऽहिराखुं मूषकमिवेति ४८ ॥

किंच कालात्मनात्वयाभिपन्नो देह एवं भवतीत्याह पुरेति स्वसृगालादिभिर्भक्षितो विट्संज्ञितः ते
रभक्षितः कृमिसंज्ञितः दग्धो भस्मसंज्ञितो भवतीति ४९ किंच अनेकशो ग्रामैः प्राग्पादिभिर्विजयिनोरा
ज्ञोपि पारं तत्र ऋतुः त्वत्तद्वस्थमेवेत्याह निर्जित्येति अभूतविग्रहः अविद्यमानसंग्रामः पूर्वं येस
मास्तैराजभिर्वंदितोपि भिक्षुनीभावसात्वमेवे पर्यंये भुतेषु योषितां महहेषु क्रीडाम्हगारवत्तस्ततो नीय
ते ५० किंच तत्रातितक्ष्याकुलस्य नभोगा बलाः कश्चिदस्तीत्याह करोतीति तपसि श्रयः शय

पुरा यथेर्हेमपरिष्कृतैर्भूरवमतंगजैर्योनरदेवसंज्ञितः सएवकालेनदुरत्ययेन तेकलेवरोवि
ट्कृमिभस्मसंज्ञितः ४९ निर्जित्यदिक्चक्रमभूतविग्रहोवरासनस्थः समराजवंदितः गृ
हेषुमैथुन्यसुखेषु योषितांक्रीडामृगः पूरुषईश नीयते ५० करोतिकर्माणितपः सुनिष्ठि
तो निवृत्तभोगास्तदपेक्षयाददत् पुनश्चभूयेयमहंस्वराडिति प्रवृद्धतर्षोनसुखाय कल्पते ५१
भवापवर्गोभ्रमतो यदाभवेज्जनस्यतर्ह्यच्युत सत्समागमः सत्संगमो यर्हि तदैव सद्गतौ परा करोतेर्वि ज्ञायतेमतिः ५२

नवसन्नचर्यादौ सुनिष्ठितः पुनश्च स्वराडिंद्रः स्यामिति यद्वा जन्मांतरेष्वेवमेव चक्रवर्तीस्यामिति ५१ ता
देवमद्यभिः प्रनोवैरी श्रवहिर्मुखानां संसारं प्रपंच्य भक्तानां निवृत्तिक्रममाह भवापवर्गइति भोग्यभ्र
तम्भ्रमतः संसरतो जनस्य यदा तदनुग्रहेणाभवस्यापवर्गः अंतोभवेत् प्राप्तकालः स्यात् त
दासतां संगमो भवेत् यदाच सत्संगमो भवेत्तदा सर्वसंगनिवृत्याकार्यकारणनियंतरि त्वयि भक्ति ८
र्भवति ततो मच्चनत्यर्थः ५२ ॥

ममतत्सत्संगमात्सर्वमेवयोराज्यादिसंगविच्छेदोजातः सोयंत्वयामहाननुग्रहःकृतइत्याह मन्यइति तेनत्वया
साधुभिर्विवेकिभिः त्वत्सेवनंप्रवेष्टुमिच्छद्भिः स्वयंत्यक्तुमलभमानैःप्रार्थ्यतइति ५३ तदेवंविषयसे-
वामार्गंभगवत्सेवामार्गंचविविच्यवरान्वृणीष्वेतियदुक्तंतत्रोत्तरमाह नकामयइतिअकिंचनानिवृत्ता-
भिमानाः आर्योविवेकी ५४ रजस्तमःसत्वगुणैरनुबध्यंतइतितथाभूताः ऐश्वर्यादिप्राकृमरणादिधर्मादि
हृत्वा विसृज्यएवंभूतंपुरुषमीश्वरं ज्ञप्तिमात्रंज्ञानघनं कुतः निरंजनं तत्कुतः निर्गुणंतदपिकुतःअ-

मन्येममानुग्रहईशतेकृतोराज्यानुबंधापगमोयदृच्छया यःप्रार्थ्यतेसाधुभिरेकचर्ययावनंविविक्षद्भि-
रखंडभूमिपैः ५३ नकामयेन्यंतवपादसेवनादकिंचनप्रार्थ्यतमाद्वरंविभो आराध्यकस्त्वांह्यपव-
र्गदंहरेवृणीतआर्योवरमात्मबंधनं ५४ तस्माद्विसृज्याशिषईशसर्वतोरजस्तमःसत्वगुणानुबं-
धनाः निरंजनंनिर्गुणमद्वयंपरंत्वांज्ञप्तिमात्रंपुरुषंव्रजाम्यहं ५५ चिरमिहवृजिनार्तस्तप्यमा-
नोनुतापैरवितृषषडमित्रोलब्धशांतिः कथंचित् शरणदसमुपेतस्त्वत्पदाब्जंपरात्मन्नभयमृतम-
शोकंपाहिमापन्नमीश ५६

द्वयंअतएवात्मरूपंत्वांशरणंव्रजामीति ५५ भुक्त्वातावद्भोगानकैवल्यंतत्करस्थमेवेतिपुनर्वरैःप्रलोभयंतंप्री-
कृष्णंप्रसादोपग्रहेणप्रार्थयतेचिरमिति वृजिनैःकर्मफलैरार्तः पुनस्तद्वासनाभिस्तप्यमानः तथापिअवि-
तृषषडमित्रः तृडेवतृषातस्मान्नविगतातृषाः षडमित्राःपंचबुद्धींद्रियलक्षणायस्यसः अतएवालब्धशांतिः
कथंचिद्दैववशेनलब्धशांतिरितिवा शरणंसत्वानंतदृष्टानीतितथाहेशरणद समुपेतःप्राप्तोहंअशो-
कत्वेहेतुःअभयंतत्रापिहेतुः ऋतंअपायअपदार्थंमांपाहीति ५६ ॥

भा० द० ५१

अप्रमादाय प्रमादाय न भवत्येवं कृतं त्वयेत्यत आह नधीरिति एकांतभक्तानां धीराशीर्भिः कामैरपि न भिद्यते तेन सज्ज्ञानं तत्त्वार्थः ५७ व्यतिरेकमाह युंजानानामिति उत्थितं विषयाभिमुखं ५८ तुभ्यं तव ५९

श्रीभगवानुवाच॥ सार्वभौममहाराजमतिस्तेविमलोर्जिता वरैः प्रलोभितस्यापिनकामैर्विहता।
यतः ५७ प्रलोभितोवरैर्यत्त्वमप्रमादायविद्धितत् नधीर्मय्येकभक्तानामाशीर्भिर्भिद्यतेक्वचित्
५८ युंजानानामभक्तानांप्राणायामादिभिर्मनः अक्षीणवासनंराजन्दृश्यतेपुनरुत्थितं
५९ विचरस्वमहींकामंमय्यावेशितमानसः अस्त्वेवंनित्यदातुभ्यंभक्तिर्मय्यनपायिनी ६०
क्षात्रधर्मस्थितोजंतून्नवधीर्मृगयादिभिः समाहितस्तत्तपसाजह्यघंमदुपाश्रितः ६१ जन्म
न्यनंतरेराजन्सर्वभूतसुहृत्तमः भूत्वाद्विजवरस्त्वंवैमामुपैष्यसिकेवलं ६२ ॥इतिश्रीभागव
तेमहापुराणेदशमस्कंधेमुचुकुंदस्तुतिरेकपंचाशत्तमोध्यायः॥ श्रीशुकउवाच॥ इत्थंसोनु।
गृहीतोंगकृष्णेनेक्ष्वाकुनंदनः तंपरिक्रम्यसन्नम्यनिश्चक्रामगुहामुखात् १ संवीक्ष्यक्षुल्ल।
कान्मर्त्यान्पशून्वीरुद्वनस्पतीन् मत्वाकलियुगंप्राप्तंजगामदिशमुत्तरां २ तपःश्रद्धायुतो।
धीरोनिःसंगोमुक्तसंशयः समाधायमनःकृष्णेप्राविशद्गंधमादनं ३ बदर्याश्रममासाद्यनर।

युग्माभासेन भीषयंस्तपसि लोकसंग्रहे प्रवर्तयति क्षात्रधर्मेति ६०॥ दशमेएकपंचाशतमः॥ द्विपं
चाशेतमेथावनभयादिवातः पुरीं अत्र मोचतसंदेशेनकृतिणा द्विजवर्णितं १ क्षुल्लकानल्पान्।

निःस्नेनयन्मार्गेवलतिस्म ५ वेगारभसांवेगोद्रेकं ६ भीरुभीतवत् भीरोरपिभीतवत् अति।
भीतवदित्यर्थः ७ चेलतुः पलायेतांवहुयोजनं देशं ८ अप्रमाणवित्तप्रमाणमियत्तातज्ञवेत्ती
तितया ९ तुंगःप्रकाटशयोजनोन्नतं प्रकर्षेणवर्षंत्यस्मिन्निति प्रवर्षणः तस्याख्यायस्यतं नदा।

भगवानुग्रसेनात्मजापुरीयवनवेष्टितां हत्वाम्लेच्छवलं निन्येनदीयं द्वारकांयतनं ५ नीयमा।
नेयनेगोभिर्न्दृभिश्चाच्युतचोदितैः आनगामजरासंधस्त्रयोविंशत्यनीकपः ६ विलोक्य
वेगारभसंरिपुसैन्यस्यमाधवो मनुष्यचेष्टामापन्नोराजन्नदुद्रुवतद्रुतं ७ विहायवित्तंप्रचु
रमभीतोभीरुभीतवत् पद्भ्यांपद्मपलाशाभ्यांचेरतुर्वहुयोजनं ८ पलायमानौतौदृष्ट्वाप्र
हसन्मागधोवली अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ९ प्रद्रुत्यदूरंसंश्रान्तौतुंगमा
रुहतांगिरिं प्रवर्षणाख्यंभगवान्नित्यदायत्रवर्षति १० गिरौनिलीनावाज्ञायनाधिग
म्यपदंन्नृप ददाहगिरिमेधोभिः समंतादग्निमुत्सृजन् ११ ततउत्पत्यतरसादह्यमानत
टादुभौ दशैकयोजनोत्तुंगान्निपेततुरधोभुवि १२ अलक्ष्यमाणौरिपुणासानुगेनयदूत्त
मौ स्वपुरंपुनरायातौसमुद्रपरिखांनृप १३ सोपिदग्धाविति मृषामन्वानोवलकेशवौ

५२ [illegible]

हृ भगवानिति इंद्रः १० तत्रविविक्तत्वंपितयोः पदंनिलयस्थानं अनधिगम्य ११ ततोगिरेः
दशावणकंचयानियोजनानितावत् उत्तुंगान् मागधसंरोधदेशमतिक्रम्यपरतोधोनिपेत

भा॰ द॰ ५२

१५ श्रीकृष्णस्यविवाहान्निरूपयितुंबलदेवविवाहंनवमस्कंधोक्तमनुस्मारयति आनर्तेति माञ्चो २ २२
कलौ १६ गारुडोयथादेवान्प्रमथ्यसुधामहारत्तथेति १७ राक्षसोयुद्धहरणादितिस्मृतेः राज्ञः प्र
मथ्येति चवद्धन्याराक्षसेनविधानेनोपयेमेपरिणीतवानितिश्रुतं १८ पूर्वमेववासामान्यतएव

आनर्ताधिपतिः श्रीमान्रैवतोरेवतींसुतां ब्रह्मणाचोदितःप्रादाद्बलायेतिपुरोदितं १५
भगवानपिगोविंदउपयेमेकुरूद्वह वैदर्भींभीष्मकसुतांश्रियोमात्रांस्वयंवरे १६ प्रम
थ्यतरसाराज्ञःशाल्वादींश्चैद्यपक्षगान् पश्यतांसर्वलोकानांतार्क्ष्यपुत्रःसुधामिव १७
राजोवाच॥ भगवान्भीष्मकसुतांरुक्मिणींरुचिराननां राक्षसेनविधानेनउपयेमइतिश्रु
तं १८ भगवन्श्रोतुमिच्छामि कृष्णस्यामिततेजसः यथामागधशाल्वादीन्जित्वाक
न्यामुपाहरत् १९ ब्रह्मन्कृष्णकथाःपुण्यामाध्वीर्लोकमलापहाः कोनुतृप्येतशृ
ण्वानःश्रुतज्ञोनित्यनूतनाः २० ॥श्रीशुकउवाच॥ राजासीद्भीष्मकोनामविदर्भाधिपतिर्म
हान् तस्यपंचाभवन्पुत्राःकन्यैकाचवरानना २१ रुक्म्यग्रजोरुक्मरथोरुक्मबाहुरनं
तरः रुक्मकेशोरुक्ममालीरुक्मिण्येषास्वसासती २२ सोपश्रुत्यमुकुंदस्यरूपवीर्यगु
णश्रियः गृहागतैर्गीयमानास्तंमेनेसदृशंपतिं २३

श्रुतं १९ पूर्वमेववासामान्यतएवश्रुतंविशेषेणतुश्रोतुमिच्छामि १९ श्रवणोत्सुकतामाविःकरो
ति ब्रह्मन्निति पुण्याःमहाफलाःमाध्वीःश्रुतिसुखाः लोकस्यमलापहाःशृण्वानःशृण्वानस्तृप्येत्॥ १०

वेद्यममन्यतनतस्मावरमित्यर्थः २४ अवेत्यतातोऽयमितायोगीसनीलकराद्वाकुणालायकृत्समानेतुं।
प्रेषयामास २५ प्रतीहारैर्द्वारपालैः २७ आत्मानं श्रीकुलं २८ अभिसरणानुगानैः संमर्दयन् २९
सधर्मोऽस्य ब्राह्मणस्याखिलकादोगायाडाससब्राह्मणोऽस्यविप्रस्याखिलकामधुगिति ३१ लोकानोऽमो

तां बुद्धिलक्षणोदार्यकृतमशीलगुणाग्रयां कुणालमसहधर्मभार्यांसमज्ञोऽहंमनोदये २४ वेश्
नामिकृतां दानं कुणालायभगिनींन्नृप ततोनिवार्यकुणालद्विट्कृतकीवेद्यममन्यत २५ तदेवे
न्यामिनायोगीवेद्यमौकुमनाम्यस्य विचिंत्यामं द्विजंकंचित्कुणालायेप्राहिणोद्रुतं २६ हम्यकांमस
मभ्येत्यप्रतीहारैः प्रवेशितः अपश्यदाढ्यंपुरुषमासीनंकांचनासने २७ हृष्टाब्राह्मणदेवस्त
मवरुह्यनिजासनात् उपवेश्यार्हयांचक्रेयथात्मानंदिवौकसः २८ तमभ्यर्च्यतंविश्रांत
मुपगम्यसतांगतिः पाणिनाभिसरणान्यादावव्यग्रः समपृच्छत २९ कच्चिद्विजवरश्रेष्ठय।
र्मास्तेवेद्युसंमतः वर्ततेनातिकृच्छ्रेणसंतुष्टमनसः सदा ३० संतुष्टोयर्हिवर्ततब्राह्मणोयो।
नकेनचित् अहीयमानः स्वान्धर्मान् सह्यस्याखिलकामधुक् ३१ असंतुष्टोसकृल्लो।
कानाप्नोत्यपिसुरेश्वरः अकिंचनोऽपिसंतुष्टः शेतेसर्वांगविज्वरः ३२

निलोकाभल्लोकाननंतरंपर्यटंतिमेकत्रनिर्वृतस्तिष्ठतीत्यर्थः नाप्नोतीतिपाठेसुरेश्वरोऽपिमत्तालोका
न्नाप्नोतिउत्तमलोकानप्राप्नोत्यप्राप्यइवक्लिश्यतीत्यर्थः शेतेस्वास्थ्यमास्तइत्यर्थः तदेवाह सर्वेषु

कल्पद्रुमावदानमालाटीका: २२

भा० ३ ११

स्वलाभःस्वतएवप्राप्तोलाभः आत्मलाभोवातेनसंतुष्टान्पूर्णान्साधून्स्वधर्मनिष्ठान् १३ यस्मा
त्तोविषयेदेशे यतःस्थानात्यदिच्छयायस्यकार्यस्येच्छयादुर्गंसमस्त्रं १४ संपृष्टःसंप्रश्नःपृष्टश्चोद्यो
र्थेसः परमेष्ठिनापरमेश्वरेणैवेत्यूनामभिप्रेतेरुक्मिण्याश्चेष्टितमित्यादिसर्वं १५ रुक्मिण्यास्वयमे
कांतेलिखितानाटतपत्रिका सद्दामनन्तस्यकृष्णायप्रेमविह्वामदर्शयत् ब्राह्मणःश्रीकृष्णान्नया

विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् निरहंकारिणःशांतान्नमस्येशिरसासकृत्
१३ कच्चिद्वःकुशलंब्रह्मन्राजतोयस्यहिप्रजाः सुखंवसंतिविषयेपाल्यमानाःसमेप्रि
यः १४ यतस्त्वमागतोदुर्गंनिस्तीर्येहयदिच्छया सर्वंनोब्रूह्यगुह्यंचेत्किंकार्यंकरवा
णिते १५ एवंसंपृष्टसंप्रश्नोब्राह्मणःपरमेष्ठिना लीलागृहीतदेहेनतस्मैसर्वमवर्णय
त् १६ ॥रुक्मिण्युवाच॥ श्रुत्वागुणान्भुवनसुंदरशृण्वतांते निर्विश्यकर्णविवरैर्हरतोंगता
तापं रूपंदृशांदृशिमतामखिलार्थलाभं त्वय्यच्युताविशतिचित्तमपत्रपंमे १७

वाचयतिश्रुत्वेति अयमर्थःहेअच्युतहेभुवनसुंदरेति श्रोतृकंयोनयति कृतवमहिमाक्षो
वाहेरूपकुलशीलादियुक्तापितथापिअपरानात्रपायस्मात्ततमेवितेत्वयिप्राविशति आस
क्तते तत्कुतस्तत्राह शृण्वतांकर्णविवरैरंतःप्रविश्यअंगानांतापंअंगेतिसंबोधनंवा हरतस्त
वगुणान्श्रुत्वातथादृशिमतांचक्षुष्मतांदृशामखिलार्थलाभात्मकंरूपंचश्रुत्वेति १८ ११

अहो कुलकन्यानामिदमनौचित्यमिति माशंकिष्ठा इत्याह कान्तेति हे मकुंद हे नरसिंह नरश्रेष्ठ कान्ता
मकन्या कुलवतीन यामहतीम् गुणोदारां तथापि मम त्वां पतिं न वृणीतेति मयैव केयं दोषशंके तिभा
वः कथंभूतं कुलशीलादिभिरात्मनैव तुल्यं निरुपममित्यर्थः द्रविणं द्रव्यसंपत् धाम प्रभावः तथा
नरलोकस्य मनसोऽभिरामो मनोरमणीयस्मात् किंच कालेविवाहावसरे ३९ हे विभो तत्तस्मात्मम
या भवान् खलु पतिर्वृतः आत्मा च भवतोऽर्पितः अत्र त्वमत्रागत्य मां तव जायां विधेहि विपक्षे बाधकं

कात्वा मकुंद महती कुलशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यं धीरा पतिं कुलवती न
कृ२ वृणीत कन्या काले नरसिंह नरलोकमनोभिरामं ३९ तन्मे भवान् खलु वृतः पतिरंग जायामात्मा
र्पितश्च भवतोऽत्र विभो विधेहि मा वीरभागमभिमर्शतु चैद्य आराद्गोमायुवन्मृगपतेर्बलिमंबु
जाक्ष ३९ पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान् परेशः आराधितो यदि
गदाग्रज एत्य पाणिं गृह्णातु मे न दमघोषसुतादयोऽन्ये ४० श्वो भाविनि त्वमजितोद्वहने विदर्भान्
गुप्तः समेत्य पृतनापतिभिः परीतः निर्मथ्य चैद्यमगधेन्द्रबलं प्रसह्य मां राक्षसेन विधिनोद्वह । वीर्यशुल्काम्

यो न पत्याह मा वीरभागमिति वीरस्य तव भागं आरात् शीघ्रं एत्य आगत्य चैद्यो माभिमर्शतु मा स्पृशतु
मृगपतेर्बलिं गोमायुः शृगाल इवेति ३९ अनेकजन्मकृतैः सुकृतैः सुकृतैरिदमेव भूयादिति प्रार्थ्य
यते पूर्तेति पूर्तं कूपादि इष्टं अग्निहोत्रादि दत्तं हिरण्यादि नियमस्तीर्थाटनादि व्रतं कृच्छ्रादि ४० चै
द्यादिवधं भूमिर्प्लिता यां त्वयि किमयुना करणीयमित्यपेक्षायामाह श्वो भाविनीति हे अजित श्वो भावि।

भा॰ द॰ ८२

ननु भवत्तु शिशुपालादि विरुद्धप्रमथनं अन्तःपुरमध्यगतया आत्तवक्त्रे शोभनात्वद्दुःखं वयोपि प्रसन्नेनेत्यत
आह अन्तःपुरेति पुराहं हि वेनेमानो गिरिशामं विका अविकारहादेवसमहराणोस्करमिति भावः
४२ ननु किमनेनार्थकारिणा निर्बंधेन वैद्योपि नावत्यं लभ्यानंगकर्मा योग्य एव वर इति तत्राह य
स्येति हे अंबुजाक्ष यस्य भवतो अंघ्रिपंकजरजोभिः स्नपनं आत्मनस्तमसोपहत्यै उमापति रिव महांतो

अन्तःपुरांतरचरीमनिहत्य बंधूनत्वामुद्वहे कथमिति प्रवदाम्युपायं पूर्वेद्युरस्ति महती कुलदे
वयात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात् ४२ यस्यांघ्रिपंकजरजः स्नपनं महांतो वांछंत्यु
मापतिरिवात्मतमोपहत्यै यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादं जह्यामसून्व्रतकृशान्शतज
न्मभिः स्यात् ४३ ॥ब्राह्मण उवाच॥ इत्येते गुह्यसंदेशा यदुदेव मयाहृताः विमृश्य कर्तुं यच्चात्र
क्रियतां तदनंतरं ४४ ॥इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिणीपत्रिकावाहो नाम द्विपं
चाशत्तमोऽध्यायः ॥ ॥श्रीशुक उवाच॥ वैदर्भ्याः स तु संदेशं निशम्य यदुनंदनः प्रगृह्य पाणिना पाणिं

प्रहसन्निदमब्रवीत्

वांछंति नतस्य भवतः प्रसादं यद्यहं न लभेय न प्राप्नुयां तर्हि व्रतैरुपवासादिभिः कृशान् असून्प्राणान्
न जह्यां त्यजेयं ततः किमित्यत आह शतजन्मभिरिति एवमेव वारंवारं जह्यां यावच्छतजन्मभिरपि
तव प्रसादः स्यादिति अत्र यत्कर्तुं करणीयं तत्क्षिप्रमेव क्रियतां तदनंतरमेव क्रियतामिति ४४
द्विपंचाशत्तमः ॥ त्रिपंचाशत्तमे गत्वा विदर्भान्नंदनो हरिः रुक्मिणीमहरत्क्रुद्धो मिषतां हि

केवल॰ ८२

निद्रायामलाभे कारणं त्वं वेदेति तयाकथितमप्यहं जानामीति आनयिष्ये आनेष्यामि राजन्या
पसदान्नृराजसु हीनान् उन्मथ्यानयनेदृष्टांतः पयसदति १ उद्वाहर्क्षमिति पश्चाद्रात्रौ विवाहनक्ष
त्रमितिविज्ञायतसंवारावमस्थाय प्रातर्विदर्भदेशानगमत् भामाविनितमनितोद्वहनेविदर्भान्याः
मः समेत्येतिरुक्मिणीसंदेशान् ४ सेवाद्यन्याटीनि चत्वारि अश्वनामानि ५ पुत्रस्यरुक्मिणः स्नेहे नत

श्री ग न च तथाहमपिनिश्चितोनिद्रां च न लभे निशि वेदाहं रुक्मिणो द्वेषान्ममोद्वाहो निवा
रितः २ तामानयिष्य उन्मथ्य राजन्यापसदान्मृधे मत्परामनवद्यांगीमेधसोऽग्निशिखामिव ३ उद्वा
हर्क्षं स विज्ञाय रुक्मिण्या मधुसूदनः रथः संयुज्यतामाशु दारुकेत्याह सारथिं ४ स चाश्वैः शैब्य
सुग्रीवमेघपुष्पबलाहकैः युक्तं रथमुपानीय तस्थौ प्रांजलिरग्रतः ५ आरुह्य स्यंदनं शौरिः
द्विजमारोप्य तूर्णगैः आनर्तादेकरात्रेण विदर्भानगमद्धयैः ६ राजा स कुंडिनपतिः पुत्रस्नेह
वशं गतः शिशुपालाय स्वां कन्यां दास्यन्कर्माण्यकारयत् ७ पुरं संमृष्टसंसिक्तमार्गरथ्याच
तुष्पथं चित्रध्वजपताकाभिस्तोरणैः समलंकृतं ८ स्रग्गंधमाल्याभरणैर्विरजोंबरभूषितैः
जुष्टं स्त्रीपुरुषैः श्रीमद्गृहैरगरुधूपितैः ९ पितॄन्देवान्समभ्यर्च्य विप्रांश्च विधिवन्नृप भो।

हयामनुगच्छतीतितथा अनेनशिशुपालेनाभिरुचिं द्योतयति कर्माणिपुरालंकारपितृदेवार्चनादी
नि ७ तान्येवाहपुरमित्यादिचतुर्भिः संमृष्टाः संसिक्ताश्चमार्गादयो यस्मिन्तत् चित्रध्वजपताका
स्ताभिः समलंकृतमकारयत् ८ स्रग्गंधमाल्याभरणैरित्यत्रमत्वर्थोलुप्तः यद्वास्रग्गंधमाल्याभ्या
विभ्रतीतितथातैः तथाविरजोंबरैर्भूषितैश्च स्त्रीपुरुषैर्जुष्टं तथाश्रीमद्भिः गृहैश्चजुष्टं ९ यथान्या

२

कृतकौतुकेन विवाहसूत्रेण मंगलं यस्मात्तां अहतेन नवीनेन भूषणोत्तमैः भूषितां ९ वध्वास्त
स्याः कन्यायाः अथर्ववित् अथर्वणामंत्रवित् ११ अभ्युदयेऽचिते १२ ततश्चतुरंगसैन्यैः प
रिवृतः कुंडिनं भीष्मकस्य पुरं ययौ मदच्युतो गजाः मदच्युतः तैः स्यंदनैः रथैः हेमरचितमाला।

स्नातां सुदतीं कन्यां कृतकौतुकमंगलां अहतांशुकयुग्मेन भूषितां भूषणोत्तमैः ९ च
क्रुः सामयजुर्मंत्रैर्वध्वा रक्षां द्विजोत्तमाः पुरोहितोऽथर्वविद्वै जुहाव ग्रहशांतये ११ हिरण्यरू
प्यवासांसि तिलांश्च गुडमिश्रितान् प्रादाद्धेनूश्च विप्रेभ्यो राजा विधिविदां वरः १२ एवं चे
दिपती राजा दमघोषः सुताय वै कारयामास मंत्रज्ञैः सर्वमभ्युदयोचितं १३ मदच्युद्भि
र्गजानीकैः स्यंदनैर्हेममालिभिः पत्त्यश्वसंकुलैः सैन्यैः परीतः कुंडिनं ययौ १४ तं वै वि
दर्भाधिपतिः समभ्येत्याभिपूज्य च निवेशयामास मुदा कल्पितान्यनिवेशने १५ तत्र शा
ल्वो जरासंधो दंतवक्त्रो विदूरथः आजग्मुश्चैद्यपक्षीयाः पौंड्रकाद्याः सहस्रशः १६ कृष्ण
रामद्विषो यत्ताः कन्यां चैद्याय साधितुं यद्यागत्य हरेत्कृष्णो रामाद्यैर्यदुभिर्वृतः १७ योत्स्या
मः संहता तेन इति निश्चितमानसाः आजग्मुर्भूभुजः सर्वे समग्रबलवाहनाः १८ श्रु
त्वैतद्भगवान् रामो विपक्षीयनृपोद्यमं कृष्णं चैकं गतं हर्तुं कन्यां कलहशंकितः १९ बले
न महता सार्द्धं भ्रातृस्नेहपरिप्लुतः त्वरितः कुंडिनं प्रागात् गजाश्वरथपत्तिभिः २० भीष्म।

विघ्नं तेषु तैः १४ कल्पितं यदन्यन्निवेशनं तस्मिन् १५ यदि श्रीकृष्णो हरेदिति शंकिताः कन्यां
साधयितुमित्यर्थः सूर्योदयात्पूर्वमेवोत्कंठेन रुक्मिणि एव चिंतयदित्याह भीकन्येति प्रत्यापतिश्च

त्रियमाणत्रिसंध्यावन्मात्रेणोनरति: अल्पायासोमंदभाग्यायाः २२ जगत्स्थितेयाष्टर्गादिप्रतीतिशंका
यो नायातिहि कृतोयमइतिअस्यार्थः आदौकृतोयमनात्तेनप्रस्थापितवानप्रस्थापनावसरेच किं
चितमपिजगत्स्थितेमनाप्रत्याचष्ट अतःसोपिद्विजोनूनंनायातीति यद्वाततोनिर्गतोपिश्रीकृष्णो
मदैववैमनस्यातनकुचित्प्रतिवंधोभवेदित्याह दुर्भगायाइति २४ कालज्ञानाद्युनापितोविंदागमन

अहोत्रियामांतरितउद्वाहोमेल्पायसः नागच्छत्यरविंदाक्षोनाहंवेद्म्यत्रकारणं २२ सोपिना
वर्ततेद्यापिमत्संदेशहरोद्विजः अपिमय्यनवद्यात्मादृष्ट्वाकिंचिज्जुगुप्सितं २३ मत्पाणिग्रह
णेनूनंनायातिहिकृतोद्यमः दुर्भगायानमेधातानानुकूलोमहेश्वरः २४ देवीवाविमुखागौ
रीरुद्राणीगिरिजासती एवंचिंतयतीवालागोविंदहृतमानसा २५ न्यमीलयतकालज्ञानेत्रे
चाश्रुकलाकुले एवंवध्वाप्रतीक्षंत्यागोविंदागमनंनृप २६ वामऊरुर्भुजोनेत्रमस्फुरन्प्रियभा
षिणः अथकृष्णविनिर्दिष्टःसएवद्विजसत्तमः २७ अंतःपुरचरींदेवींराजपुत्रींददर्शह सातं
प्रहृष्टवदनमव्यग्रात्मगतिंसती २८ ॥

कालइतिमत्वानाकिंचिदाश्वस्तचिंतासतीचिंतालज्जेलोचनेनिमीलितवतीत्यर्थः २६ प्रियभाषि
णः प्रियसूचकाः पुरोयवनेप्राप्तेनश्रीकृष्णेनविनिर्दिष्टःप्राप्तेमांकथयेत्यादिष्टः २७ अव्यग्रात्म
नोदेहस्यगतिर्यस्यतं हृतस्थलक्षणेनतेनकार्यस्यसूचकमभिजानातीतितथा २८ ॥
॥ ॥ ॥

भा० १० ५३

तस्मैप्राप्तंयदुनन्दनमावेदितवान् तच्चशशंस आत्मोपनयनंप्रति आत्मनास्वयंश्रीकृष्णस्यानयनंप्रतितेनद्विजेनसत्यवचनंचोक्तमिति आत्मनः प्राणेश्वरस्येतिवा यद्वाआत्मनस्तस्याउपनयनंप्रतिश्रीकृष्णेनयदुक्तंसत्यवचनंतामामुद्यिष्ये इत्यादितच्चशशंसश्रावयामासेत्यर्थः २९ तंश्रीकृष्णंस्वस्मिन्कार्येसर्वस्वार्पणमपिस्वपर्याप्तमितितद्दिवित्तंप्रियमपश्यन्तीतदाकेवलेननाम पश्चाद्दृष्ट

आलक्ष्यलक्षणाभिज्ञासमपृच्छत्कृतशुचिस्मिता तस्माआवेदयत्प्राप्तंशशंसयदुनन्दनं उक्तंचसत्यवचनमात्मोपनयनंप्रति ३० तमागतंसमाज्ञायवैदर्भीहृष्टमानसा नपश्यन्तीब्राह्मणायप्रियमन्यन्ननामसा ३१ प्राप्तौश्रुत्वास्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ अभ्ययात्तूर्यघोषेणरामकृष्णौसमर्हणैः ३२ मधुपर्कमुपानीयवासांसिविरजांसिसः उपायनान्यभीष्टानिविधिवत्समपूजयत् ३३ तयोर्निवेशनंश्रीमदुपकल्प्यमहामतिः ससैन्ययोःसानुगयोरातिथ्यंविदधेयथा ३४ एवंराज्ञांसमेतानांयथावीर्यंयथावयाः यथाबलंयथावित्तंसर्वैःकामैःसमर्हयत् ३५ कृष्णमागतमाकर्ण्यविदर्भपुरवासिनः आगत्यनेत्राञ्जलिभिःपपुस्तन्मुखपंकजं ३६ ५६

टावित्यर्थः यद्वामांप्रियंयेनमंतितेनावतसर्वेसंपदामास्पदंभवेतिकिंपुनर्मयिप्रणतायामितितनोधिकमन्यत्प्रियंनपश्यन्तीननामेति ३१ महामतिरित्यनेनश्रीकृष्णोवाठंकन्याबुद्धोढुमेवागतःस्यादितिवक्तव्येनविधिनासमपूजयदितिसूचितं यथायथावत् ३२ ससैन्ययोःराज्ञांमध्येवीर्याद्यनतिक्रमणेनसमर्हितवानित्यर्थः ३५ श्रीकृष्णेभाविकर्मसूचकंजनानुरागंदर्शयति श्रीकृ

अस्यैव रुक्मिण्येवार्हन्त्येव अस्मा एव वभैष्म्याण्व समर्चितण्वेति षड्वधाय्याणानि तत्रैकस्मिन्व्यति।
रेकप्रदर्शनमुपलक्षणार्थं नापरेति न च वाक्यभेददोषः अनूद्यविधेयभेदेन विभिन्नानामे
व वाक्यानां सहप्रयोगात् ग्रहं संमार्ष्टीत्यादिवदिति ३७ अयमेवानुग्रह इति निर्दिशति रहस्याति

अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा अस्मा एवानवद्यात्मा भैष्म्याः समर्चितः पतिः ३७
किंचित्सुचरितं यन्नास्तेन तुष्टस्त्रिलोककृत् अनुगृह्णातु गृह्णातु वैदर्भ्याः पाणिमच्युतः ३८
एवं प्रेमकलाबद्धा वदन्ति स्म पुरौकसः कन्या चान्तःपुरात्प्रागाद्भटैर्गुप्ताम्बिकालयं प
द्भ्यां विनिर्ययौ द्रष्टुं भवान्याः पादपल्लवे ३९ सा चानुध्यायती सम्यक्मुकुन्दचरणाम्बुजं ।
यतवाक्मातृभिः सार्द्धं सखीभिः परिवारिता ४० गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः
मृदङ्गशङ्खपणवास्तूर्यभेर्यश्च जघ्निरे ४१ नानोपहारबलिभिर्वारमुख्याः सहस्रशः स्र
ग्गन्धवस्त्राभरणैर्द्विजपत्न्यः स्वलङ्कृताः ४२ गायन्त्यश्च स्तुवन्तश्च गायका वाद्यवादकाः
परिवार्य वधूं जग्मुः सूतमागधवन्दिनः ४३ आसाद्य देवसदनं धौतपादकराम्बुजा उपस्पृ
श्य शुचिः शान्ता प्रविवेशाम्बिकान्तिकं ४४ तां वै प्रवयसो बालां विधिज्ञा विप्रयोषितः भवा
नीं वन्दयां चक्रुर्भवपत्नीं भवान्वितां ४५

ति ३८ तस्मादगमने विशिनष्टि द्वये ऽनपायामिति ३९ अपि च मृदङ्गेत्यादि जघ्निरे आहता वादिता
इत्यर्थः ४१ वारमुख्या गणिकोत्तमाः ४२ उपस्पृश्य आचम्य ४४ प्रवयसो वृद्धाः भवान्वितामि

नमस्यन्ति स्म त्रिनयनं देवं रुद्रोऽयं मंत्रैः स्वसंतानयुतां गणेशादिसहितां आत्मारामो सौ कथं त्वन्य
प्रा० तिर्भवेदिति चेदत आह तदनमोदना मितिभवतीश्रीकृष्णपदवा ४६ स्वगंधादिभिरंबिकां सम
३० पूजयत् ४७ तथा विप्रस्त्रियोऽपि तैर्द्रव्यैर्लवणादिभिश्च समपूजयदिति ४८ शेषां निर्माल्यं।
५५ ४९ मुनिव्रतं मौनं भृत्या सव्यां ५० तां विलोक्य वीरा मम मंजीरितिनन्तीय पृष्ठोकेनान्वयः प्रणामं

नमस्येतां विकेभीतां स्वसंतानयुतां शिवां भूयात्पतिर्मे भगवान्कृष्णस्तदनमोदतां ४६
अद्भिर्गंधाक्षतैर्धूपैर्वासःस्रङ्माल्यभूषणैः नानोपहारबलिभिः प्रदीपावलिभिः प्रदीपैः ६
बलिभिः पृथक् ४७ विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् लवणापूपतांबूलकं
ठसूत्रफलेक्षुभिः ४८ तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः ताभ्यो देव्यै नमश्चक्रे
शेषां च जगृहे वधूः ४९ मुनिव्रतमथ त्यक्त्वा निश्चक्रामांबिकागृहात् प्रगृह्य पाणिना।
भृत्यां रत्नमुद्रोपशोभिना ५० तां देवमायामिव वीरमोहिनीं सुमध्यमां कुंडलमंडिताननां
श्यामां नितंबार्पितरत्नमेखलां व्यंजत्स्तनीं कुंतलशंकितेक्षणां ५१ शुचिस्मितां बिंबफ।
लाधरद्युतिशोणायमानद्विजकुंदकुड्मलां पदा चलंतीं कलहंसगामिनीं सिंजत्कलानू ६

अनामरजस्कां कुंतलेभ्यः शंकिते त्वचचपलेईक्षणे यस्यास्तां ५२ द्विजाएव कुंदानां कुड्मला।
निमुकुलानि बिंबफलवत् योधरस्तस्य द्युतिभिः शोणायमानानि तानि यस्यास्तां कलाशोभा स्क
नयुक्तं नूपुरं सिंजद्यत्तत्कलानूपुरं च तस्य थामदीप्तिः तेन शोभितं शीलमस्ति यस्यास्ते नपदावलं ५५

नकेवलंसंमुमुहुः पेतुश्चेत्याह यामिति यात्राछलेनहरयेस्वलावण्यंसमर्पयंतींयांवीक्ष्यतो
पेतुः ५३ सामानप्राप्तान्ह्रियैक्षत तदैवाच्युतंचददर्शेत्यग्रेणान्वयः चलत्पद्मकोशवल्लो
वरणौचालयंती ५४ सुपर्णोलक्षणंगरुडध्वजेहरिःसिंहः ५५ असहमानानांतेषांआक्रो

विलोक्यवीराममुहुः समागतायशस्विनस्तत्कृतहृच्छयार्दिताः यांवीक्ष्यतेनृपतयस्तदुदा
रहासव्रीडावलोकहृतचेतसउज्झितास्त्राः ५३ पेतुः क्षितौगजरथाश्वगताविमूढायात्रा
छलेनहरयेर्पयतींस्वशोभां सैवंशनैश्चलयतीचलपद्मकोशौप्राप्तिंतदाभगवतःप्रसमी
क्षमाणा ५४ उत्सार्यवामकरजैरलकानपांगैःप्राप्तान्ह्रियैक्षतनृपान्ददृशेच्युतंसा
तांराजकन्यांरथमारुरुक्षतींजहारकृष्णोद्विषतांसमीक्षतां ५५ रथंसमारोप्यसुपर्णल
क्षणंराजन्यचक्रंपरिभूयमाधवः ततोययौरामपुरोगमैःशनैःसृगालमध्यादिवभागहृद्धरिः
५६ तंमानिनःस्वाभिभवंयशःक्षयंपरेजरासंधवशानसेहिरे अहोधिगस्मान्यशआत्त
धन्विनांगोपैर्हृतंकेसरिणांमृगैरिव ५७ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेरुक्मिणीहरणेत्रिपंचाश
त्तमोध्यायः॥ श्रीशुक॥ इतिसर्वेसुसंरब्धावाहानारुह्यदंशिताः स्वैःस्वैर्बलैःपरिक्रांताअन्वी

शमाह अहोधिगस्मान् यत्तोऽस्माकंयशोगोपैर्हृतमिति ५७ ॥दशमेत्रिपंचाशत्तमः॥ चतुःपंचाश
त्तमेतुजित्वाराज्ञोःशिशुपालान् रुक्मिणंचविरूप्याथभैष्म्याःपाणिंगृहीतवान् २ इतीति अहोधि
गस्मानित्युक्त्वेवंवदंतःसंरब्धाः क्रोधाविष्टाः दंशिताः कृतसन्नाहाः परिक्रांताः परिवृताः अन्वी

भा० दु० २६

विस्फूर्ज्यटंकारयित्वा २ परेषां शराणां बाहुल्ये यादवानामचलत्वे दृष्टांतः मेघाइति ३ ऐतन
ऐतन ४ मास्मभैः माभयंकुरु हेवामलोचने नावकैः त्वदीयैः कृत्वा ५ सद्यासो विक्रमश्च।

नानायतनमाला लोका यादवानीकयूथपाः तस्थुस्तत्संमुखा राजन्विस्फूर्ज्य स्वधनूंषिते
२ अभ्यवर्षत्रोजनस्कंधे रथोपस्थेव कोविदाः समंततः शरवर्षाणि मेघा अद्रिष्विवोयथा
पत्युर्बलंशरासारैश्छन्नंवीक्ष्य सुमध्यमा सव्रीडमैक्षत्तद्वक्त्रं भयविह्वललोचना ४ प्रह
स्य भगवानाह मास्मभैर्वामलोचने विनंक्ष्यत्यधुनैवैतत्तावकैः शात्रवंबलं ५ तेषांत
द्विक्रमंवीरा गदसंकर्षणादयः अमृष्यमाणानाराचैर्जघ्नुर्हयगजान्रथान् ६ पेतुः
शिरांसि रथिनामश्विनां गजिनां भुवि सकुंडलकिरीटानि सोष्णीषाणि च कोटिशः ७
हस्ताः सासिगदेष्वासाः करभाऊरवोंघ्रयः अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च ८
हन्यमानबलानीकाद्वृष्णिभिर्जयकांक्षिभिः राजानो विमुखाजग्मुर्जरासंधपुरोगमाः
९ शिशुपालंसमभ्येत्य हृतदारमिवातुरं नष्टत्विषंगतोत्साहं शुष्यद्वदनमब्रुवन् १० भो
भोःपुरुषशार्दूल दौर्मनस्यमिदंत्यज नप्रियाप्रिययोराजन्निष्ठा देहिषु दृश्यते ११ यथा

ते ६ उष्णीषाः शिरोवेष्टनवस्त्राणि तत्सहितानि शिरांसि ७ करभाः प्रकोष्ठाः ऊरू विशेषणं वा
८ अग्राम्भदारमेव तं हृतदारमिवातुरं १० निष्ठास्थैर्यं ११ ऊहकोनर्तयितानसौ चेच्छया दुःखेपीह

[illegible]

अत्रचाहमेवदृष्टान्तस्त्वाह जरासंधः शौरेरिति कंसास्तकाशात् एकंसंयुगंपरंकेवलंत्रितिमेवा
जिग्येजितवानहं १३ दैवमदृष्टेनतद्युक्तेन १४ फल्गुतंत्रैःस्वल्पसैन्यैः १५ प्रदक्षिणःअनुकूलःस्या

शौरेःसमदृष्टाहंवैसंयुगानिपराजितः त्रयोविंशतिभिःसैन्यैर्जिग्येएकमहंपरं १३ तथा
प्यप्यहंनशोचामिनप्रहृष्यामिकर्हिचित् कालेनदैवयुक्तेनजानन्विद्रावितंजगत् १४ अ
धुनापिवयंसर्वेवीरयूथपयूथपाः पराजिताःफल्गुतंत्रैर्यदुभिःकृष्णपालितैः १५ रिपवो
जिग्युरधुनाकालआत्मानुसारिणि तदावयंविजेष्यामोयदाकालःप्रदक्षिणः १६ एवंप्रबो
धितोमित्रैश्चैद्योगात्सानुगःपुरं हतशेषाःपुनस्तेपिययुःस्वंस्वंपुरंनृपाः १७ रुक्मीतुराक्ष
सोद्वाहंकृष्णद्विडसहन्स्वसुः पृष्ठतोन्वगमत्कृष्णमक्षौहिण्यावृतोबली १८ रुक्म्यमर्षीसु
संरब्धःशृण्वतांसर्वभूभुजां प्रतिजज्ञेमहाबाहुर्दंशितःसशरासनः १९ अहत्वासमरेकृष्णम
प्रत्यूह्यचरुक्मिणीं कुण्डिनंनप्रवेक्ष्यामिसत्यमेतद्ब्रवीमिवः २० इत्युक्त्वारथमारुह्यसारथिं
प्राहसत्वरः चोदयाश्वान्यतःकृष्णस्तस्यमेसंयुगंभवेत् २१ अद्याहंनिशितैर्बाणैर्गोपा
लस्यसुदुर्मतेः नेष्येवीर्यमदंयेनस्वसामेप्रसभंहृता २२

व १६ गोपालस्यवेदपालकस्येतिवास्त्रीवीर्यः तथासुदुर्मतेरिति शोभनाअत्रचअहंवनीरुद्धेष्वपिम

२२

यदूनां कुलपांसन दूषणावलं तन्न यदूनां कुलस्य पते हे अंसन स्वयं चरिष्यहननं च तत्र अंससमाया।
तस्य तस्मात्तथा तोकं तेरिल्युड्प्रत्ययो नंद्यादिविहितः २४ ध्वांक्षः काकः स यथा हविर्मुष्णाति तद्वत्

विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित्। रथेनैकेन गोविंद तिष्ठ तिष्ठेत्यथाह्वयत् २३
धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन २४ कुत्र।
यासि स्वसारं मे मुषित्वा ध्वांक्षवद्धविः हरिष्येद्य मदं मंद मायिनः कूटयोधिनः यावन्न मे हतो
बाणैः शयीथा मुंच दारिकां २५ स्मयन्कृष्णो धनुश्छित्वा षड्भिर्विव्याध रुक्मिणं अष्टभिश्च
तुरो वाहान्द्वाभ्यां सूतं ध्वजं त्रिभिः २६ स चान्यद्धनुरादाय कृष्णं विव्याध पंचभिः तैस्ताडि
तः शरौघैस्तु चिच्छेद धनुरच्युतः २७ पुनरन्यदुपादत्त तदप्यच्छिनदव्ययः परिघं पट्टिशं शू
लं चर्मासी शक्तितोमरौ २८ यद्यदायुधमादत्त तत्सर्वं सोच्छिनद्धरिः ततो रथादवप्लुत्य ख
ड्गपाणिर्जिघांसया कृष्णमभ्यद्रवत्क्रुद्धः पतंग इव पावकं २९ तस्य चापततः खड्गं ति
लशश्चर्म चेषुभिः छित्वासिमाददे तिग्मं रुक्मिणं हंतुमुद्यतः ३० दृष्ट्वा भ्रातृवधोद्योगं रु
क्मिणी भयविह्वला पतित्वा पादयोर्भर्तुरुवाच करुणं सती ३१ योगेश्वराप्रमेयात्मन्दे
वदेव जगत्पते हंतुं नार्हसि कल्याण भ्रातरं मे महाभुज ३२

वर्त्मतस्त्र अष्टभिश्चतुर इति च्छेदः सह सूतेन वदि इत्यर्थः २५ २६ २७ २८ २९ ३० ३१ ३२ ॥

परित्रासेन विकंपितान्यंगानि यस्याः तया तथा शुचा शोकेन अवशुष्यन्मुखं यस्याः रुद्धः कंठो यस्याः
सा च सा च तया कातर्येण विस्रंसिता हेममयी माला यस्याः तया गृहीतौ पादौ येन सः
सश्मश्रुकेशसहितानि स्थानेस्थाने अवशिष्टानि श्मश्रूणि केशाश्च यथा भवंति तथा तेनैवासि।

श्रीशुक उवाच॥ तया परित्रासविकंपितांगया शुचावशुष्यन्मुखरुद्धकंठया कातर्यविस्रंसित।
हेममालया गृहीतपादः करुणो न्यवर्तत ३३ चैलेन बद्ध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रव ५
पन्व्यरूपयत् तावन्ममर्दुः परसैन्यमद्भुतं यदुप्रवीरा नलिनीं यथा गजाः ३४ कृष्णांतिकमु
पव्रज्य ददृशुस्तत्र रुक्मिणं तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः ३५ विमुच्य बद्धं क।
रुणो भगवान्कृष्णमब्रवीत् असाध्विदं त्वया कृष्ण कृतमस्मज्जुगुप्सितं ३६ वपनं श्म
श्रुकेशानां वैरूप्यं सुहृदो वधः मैवास्मान्साध्व्यसूयेथा भ्रातुर्वैरूप्यचिंतया ३७ सुखदुःख
दो न चान्योस्ति यतः स्वकृतभुक्पुमान् बंधुर्वधार्हदोषोपि न बंधोर्वधमर्हति ३८ त्याज्यः स्वे
नैव दोषेण हतः किं हन्यते पुनः क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः भ्रातापि भ्रातरं

ना प्रवपन्मुंडयन्व्यरूपमकरोत् ३४ तथाभूतं हतप्रायमित्युत्तरवाक्येप्यनुषंगः ३५ रुक्मिणीं।
सांत्वयति मैवास्मानिति ३७ पुनः कृष्णमाक्षिपति बंधुभिरिति ३८ पुनर्देवीं प्रत्याह क्षत्रियाणामि
ति येन धर्मेण भ्राता भ्रातापि भ्रातरं हन्यात् तेन तस्मात् घोरतरः अतिदारुणः धर्मः अस्मत्कोस्माकं अ।

५४

भा० द० १८

पुनः श्रीकृष्णं प्रत्याह राजसूयस्येति तथाप्यस्माकमेतदनुचिन्तमिति भावः ४१ पुनर्दैवीं प्रत्याह तवेयमि
ति सर्वभूतेषु स्थावरजंगमेषु सुहृदामहितानां चात्मनां अजवद्द्वंद्वं मन्यसे इच्छसि इयं तव विषमा असमी
चीना बुद्धिः कुतः यतस्त्वदेव सुहृदामभद्रमिति यद्वा सर्वभूतेषु सुहृदामपि स्वसुहृदां भद्रमेवेदं टंड।
रूपं स्तुतं न मभद्रं यन्मन्यसे तवेयं विषमा बुद्धिरिति अथवा सर्वभूतेषु मध्ये सुहृदां शिशुपालादीनां।

राजसूयमभेविंतस्य श्रियामानस्य तेजसः मानिनोन्यस्य वा हेतोः श्रीमदांधाः क्षिपंतिहि ४१
तवेयं विषमा बुद्धिः सर्वभूतेषु दुर्हृदो यन्मन्यसे सदाभद्रं सुहृदां भद्रमज्ञवत् ४२ आत्ममो
होन्नृणामेव कल्प्यते देवमायया सुहृत्दुर्हृदुदासीन इति देहात्ममानिनो ४३ एक एव प
रो ह्यात्मा सर्वेषामपि देहिनां नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ४४ देह आद्यंतवा
नेष द्रव्यप्राणगुणात्मकः आत्मन्यविद्यया क्लृप्तः संसारयति देहिनो ४५

रा

मभद्रं सुहृदां भद्रं च यन्मन्यसे तवेयं विषमा बुद्धिः समानं भवति अज्ञवत् अज्ञानामिव ४२ कुत इत्यत।
त आह आत्ममोह इति ४३ परमार्थमाह एक एवेति परः शुद्धः ज्योतिः सूर्यादिर्यथोदकेषु नभो
यथा घटादिष्विति ४४ केन तर्हि न चंद्रादिवत् आत्मानं एकं शुद्धं प्रतीमस्तत्राह देह इति द्रव्यम
धिभूतं प्राणा इंद्रियाण्यध्यात्मं गुणाः अधिदैवतं त्रितयात्मकः देहोपाधिनाशुद्धो न प्रतीयते इ। हरि
१८

ननुदेहसंबंधेनापिसंसारेसत्तिशुद्धत्वंगतमेवतत्राह नात्मनइति हेसतिअन्येनअधिभूतादिनाआ
त्मनःसंयोगोवियोगोनसतःकुतःअसतःअसत्वात्तुच्छत्वेत्यर्थः कुतोसत्वेनतत्राह तद्धेतुत्वादिति त
स्यान्यस्यभूतेंद्रियादेःप्रसिद्धेःप्रकाशस्यतद्धेतुत्वात् आत्महेतुकत्वात् ननुदेवैरधिष्ठितेभ्यइंद्रिये
भ्योभूतानांप्रतीतिःप्रसिद्धात्मतःप्रतीत्याचतत्प्रसिद्धिर्नात्मनइत्यतआह दृग्रूपाभ्यांयथारवेः य
थाप्रकाशकत्वेनवर्तमानयोरपिचक्षूरूपयोरवेःसकाशात्प्रसिद्धिः द्वयोरपितेजसत्वात्तदभेदश्चेत्त
थाभूतेंद्रियादीनांपरस्परसिद्धानामपिचेतन्याधीनएवप्रकाशः तत्कार्यत्वाच्चतद्व्यतिरेकेणासत्वंचे

नात्मनोन्येनसंयोगोवियोगोवाअसतःसति तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यांयथारवेः ४६ ज
न्मादयस्तुदेहस्यविक्रियानात्मनःक्वचित् कलानामिवनैवेंदोर्मृतिर्ह्यस्यकुहूरिव ४७

त्यर्थः तथाचद्रष्टादृशेवस्यतिदीपश्चत्वग्रूपंचज्योतिषोभवेत् एवंधीःखानिमात्राश्चस्फुरं
त्यात्मनमात्मनातादिति यद्वारवेःप्रसिद्धाभ्यांमेवदृग्रूपाभ्यांपरस्परसिद्धिर्यथातद्वदिति ४६ देहसंबं
धाभावादेवनात्मनोजन्मादयोपीतिवक्तुंजन्मादीनांदेहधर्मत्वमाह जन्मादयस्त्विति कथंतर्हि
जातोहंबालोहंवृद्धोहमित्यात्मनिजन्मादिप्रतीतिः देहजन्मादिनैवेतिसदृष्टांतमाह कलाना
मिवेति इंदोःकलानामेवजन्मादयोनैवेंदोर्यथातद्वत् यथाचकलानाशादेवकुहूरमावास्याइंदु
तयउच्यते तद्वदस्यात्मनोदेहस्यनाशादेवमृतिव्यवहारइत्यर्थः ४७ ॥
॥ ॥ ॥

नचात्मनोदेहादिसंबंधाभावेकथंभोक्तृभोग्यभोगप्रतीतिरित्याशंक्यसमहष्टांतेनसमर्थयति यथा
भा० यथाशयानइति आत्मानंभोक्तारंविषयान्भोग्यान्फलंभोगंचसत्यर्थेऽन्वनुभुंक्तेतथाऽबुधःसं
द० सारंप्राप्नोतीति ४८ आत्मानंशोचयतिविमोहयतिवेतितथाज्ञानं निर्हृत्यअपाकृत्य ४९ समादधे
५४

यथाशयानआत्मानंविषयान्फलमेवच अनुभुंक्तेप्यसत्यर्थेतथाप्नोत्यबुधोभवं ४८ तस्मा
दज्ञानजंशोकमात्मशोषविमोहनं तत्त्वज्ञानेननिर्हृत्यस्वस्थाभवशुचिस्मिते ४९ ॥श्रीशुक
उवाच॥एवंभगवतातन्वीरामेणप्रतिबोधिता वैमनस्यंपरित्यज्यमनोबुद्ध्यासमादधे ५० प्रा
णावशेषउत्सृष्टोद्विड्भिर्हतबलप्रभः स्मरन्विरूपकरणंवितथात्ममनोरथः ५१ अहत्वादु
र्मतिंकृष्णमप्रत्यूह्ययवीयसीं कुंडिनंनप्रवेक्ष्यामीत्युक्त्वातत्रावसद्रुषा ५२ चक्रेभोजकटंना
मनिवासायमहत्पुरम् भगवान्भीष्मकसुतामेवंनिर्जित्यभूमिपान् पुरमानीयविधिवदु
पयेमेकुरूद्वह ५३ तदामहोत्सवोनॄणांयदुपुर्यांगृहेगृहे अभूदनन्यभावानांकृष्णे
यदुपतौनृप ५४ नरानार्यश्चमुदिताःप्रमृष्टमणिकुंडलाः पारिबर्हमुपाजह्रुर्वरयोश्चि

समाहितमकरोत ५० रुक्मिणस्त्वेवंश्रुतवतोनाज्ञानंनिवृत्तमितिदर्शयन्नाह प्राणावशेष
इति ५१ अहत्वाअजित्वादुर्मतिमितिचसर्वत्रार्थः अप्रत्यूह्यअनानीयअप्रतिबुध्येतितस
त्यंअयीयसींस्वसारं यत्रविरूपितस्तत्रैवावसत ५२ वरयोर्वरवध्वोःदेयमुपस्करं ५५ ३८

रतंभितैरिंद्रकेतुभिर्ध्वजविशेषैः उपक्लृप्तानिमंगलानिलाजांकुरपुष्पप्रकरादीनितैः ५६ आ
हूताआहूताः प्रेष्ठाभूभुजस्तेषांगजैः परामृष्टछिन्नारंभाः पूगाश्चतैरुपशोभिता यद्वातैरेव

सावृष्णिपुर्युत्तभितेंद्रकेतुभिर्विचित्रमाल्यांबररत्नतोरणैः बभौप्रतिद्वार्युपक्लृप्तमंगलैरा
पूर्णकुंभागरुधूपदीपकैः ५६ सिक्तमार्गामदच्युद्भिराहूतप्रेष्ठभूभुजां गजैर्द्वाःसुपरा
मृष्टरंभापूगोपशोभिता ५७ कुरुसृंजयकैकेयविदर्भयदुकुंतयः मिथोमुमुदिरेतस्मि
न्संभ्रमात्परिधावतां ५८ रुक्मिण्याहरणंश्रुत्वागीयमानंततस्ततः राजानोराजक
न्याश्चबभूवुर्भृशविस्मिताः ५९ द्वारकायामभूद्राजन्महामोदःपुरौकसां रुक्मिण्यार
मयोपेतंदृष्ट्वाकृष्णंश्रियःपतिं ६० ॥इतिश्रीभागवते रुक्मिण्युद्वाहोत्सवोनामदशचःपं
चाशत्तमोध्यायः॥

गजैः परामृष्टाःसंस्पृष्टारंभाःपूगाश्चतैरुपशोभिता ५७ संभ्रमाद्दौत्सुक्यात्परिधावतांवधूनांमध्येमि
थः समेत्यमुदंप्रापुः ५८ ५९ ॥इतिश्रीभागवतेमहापु· दशमेचतुःपंचाशत्तमः ॥

पंचपंचाशत्तमे तु प्रद्युम्नोऽजनि कृष्णतः शंबरेणाहृतः सोऽथ हत्वा तं कांतयागमत् १ प्रद्युम्नहानि
लाभाद्यैः शंबराहरणादिना ऊढे विनामपत्न्यादि सखिद्रः खमसस्सवन २ जांबवत्यादिविवाहेभ्यः
प्रागेव प्रद्युम्नजन्म ततो विवाहाः ततः शंबरहत्या प्रद्युम्नप्रत्यागमनं अतः पुत्रकथनाप्रस्तावेपि प्र
थमं प्रद्युम्नस्य जातमात्रस्य शंबरेणाहरणं निरूप्यते प्रत्यागमनं तत्तत्कालीनमधिककथापर्यवसा ।

श्रीशुक उवाच ॥ कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना देहोपपत्तये भूयस्तमेव प्रत्यपद्य
ते १ स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः २
तं शंबरः कामरूपी हृत्वा तोकमनिर्दशं स विदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहं ३ तं
निर्जगार बलवान्मीनः सोऽप्यपरैः सह वृतो जालेन महता गृहीतो मत्स्यजीविभिः तं शं
बराय कैवर्ता उपाजह्रुरुपायनं ४ सूदा महानसं नीत्वाऽवद्यन्स्वधितिनाद्भुतं दृष्ट्वा तदुदरे
बालं मायावत्यै न्यवेदयन् ५ नारदोऽकथयत्सर्वं तस्याः शंकितचेतसः बालस्य तत्त्वमुत्प
त्तिं मत्स्योदरनिवेशनं ६ सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती

नायात्रोक्तमिति वासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासुदेवांशः स्वस्थितिहेतुनाद्वदेहोपपत्तये देहप्राप्त
ये १ अनवमः अन्यूनः २ स प्रसिद्धः कामशत्रुः शंबरस्तमात्मनः शत्रुं विदित्वा समुद्रे प्रास्य प्रक्षिप्य गृ
हमगादिति ३ निर्जगार गिलितवान् ४ स्वधितिना शस्त्रिकया अवद्यन् अवापन् खंडितवंतः ५
ततो कामोऽयं नवमर्त्येनिरुत्पत्तिं श्रीकृष्णाद्रुक्मिण्यामुत्पन्न इति ६ यशस्विनी पतिव्रता मर्ते देहप्रा

ते शिशुं कामदेवं बुद्ध्वा ८ विभ्रमं संमोहं ९ अंग हे राजन् सौरतैः भावैः उपतस्थे अभजत् १०
अधिकृता पत्नी यत्र हेतुः रतिरहं भवान्स्मर इति १२ १३ दुर्जयत्वे हेतुः मायाशतविदमिति कथं।

निरूपिता शंबरेण सा सूदोदनसाधने कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं तदार्भके ८ नाति
दीर्घेण कालेन स कार्ष्णी रूढयौवनः जनयामास नारीणां वीक्षंतीनां च विभ्रमं ९ सा तं प
तिं पद्मदलायतेक्षणं प्रलंबबाहुं नरलोकसुंदरं सव्रीडहासोत्तभितभ्रुवेक्षती प्रीत्योपत
स्थे रतिरंग सौरतैः १० तामाह भगवान्कार्ष्णिर्मातस्ते मतिरन्यथा मातृभावमतिक्रम्य वर्त
से कामिनी यथा ११ रतिरुवाच ॥ भवान्नारायणसुतः शंबरेणाहृतो गृहात् अहं तेऽधिकृ
ता पत्नी रतिः कामो भवान्प्रभो १२ एष त्वानिर्दशं सिंधावक्षिपच्छंबरोऽसुरः मत्स्योऽग्रसी
त्तदुदरादितः प्राप्तो भवान्प्रभो १३ तमिमं जहि दुर्धर्षं दुर्जयं शत्रुमात्मनः मायाशतविदं
तं च मायाभिर्मोहनादिभिः १४ परिशोचति ते माता कुररीव गतप्रजा पुत्रस्नेहाकुला दी
ना विवत्सा गौरिवातुरा १५ प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने मायावती महामायां स
र्वमायाविनाशिनीं १६ स च शंबरमभ्येत्य संयुगाय समाह्वयत् अविषह्यैस्तमाक्षेपैः क्षिपन्।
संजनयन्कलिं १७ सोऽधिक्षिप्तो दुर्वचोभिः पदाहत इवोरगः निष्क्रामद्गदापाणिरमर्षा।
ताम्रलोचनः १८

तर्हि हंतव्यस्तत्राह मायाभिरिति १४ नात्र विलंबः कार्य इत्याह परिशोचति रोदितीत्यर्थः १५ १८

वज्रस्य निःपेषे निर्घोषे यथा निष्ठुरस्तीव्रो नादो भवति तथाभूतं नादं व्यनदत्। सामान्यविशेषतया।
व्याप्यव्यापकत्वं श्रोत्रेण ग्राह्यं पचतीतिवत्। अतिनिष्ठुरं नादमकरोदित्यर्थः १९ २० वैहायसः आ

गदामाविध्य तरसा प्रद्युम्नाय महात्मने। प्रक्षिप्य व्यनदन्नादं वज्रनिःपेषनिष्ठुरं १९ ता
मापतन्तीं भगवान् प्रद्युम्नो गदया गदां। अपास्य शत्रवे क्रुद्धः प्राहिणोत्स्वगदां नृप २० स च
मायां समाश्रित्य दैतेयीं मयदर्शितां। मुमुचे शस्त्रमयं वर्षं कार्ष्णौ वैहायसोऽसुरः २१ बा
ध्यमानोऽतिवर्षेण रौक्मिणेयो महारथः। सत्त्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीं २२
ततो गौह्यकगान्धर्वपैशाचोरगराक्षसीः। प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्स ताः २३
निशातमसिमुद्यम्य सकिरीटं सकुण्डलं। शंबरस्य शिरः कायात्ताम्रश्मश्र्वोजसाहरत् २४
आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः। भार्ययाम्बरचारिण्या पुरं नीतो विहायसा
२५ अन्तःपुरवरं राजन् ललनाशतसंकुलं। विवेश पत्न्या गगनाद्विद्युतेव बलाहकः २६
तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससं। प्रलम्बबाहुं ताम्राक्षं सुस्मितं रुचिराननं २७ स्व
लंकृतमुखाम्भोजं नीलवक्रालकालिभिः। कृष्णं मत्वा स्त्रियो ह्रीता निलिल्युस्तत्र तत्र
ह २८

कार्ष्णौ स्थितः २१ सत्त्वात्मिकां सत्त्वगुणमयीं प्रायुंक्त अनन्तरस्यानुषङ्गः २२ ताः मायाः
व्यधमयत् २३ ताम्राणि श्मश्रूणि यस्मिन् तत् ओजसा बलेन २४ २५ विद्युता सह बलाहको
मेघ इव २६ नीलाश्च वक्राश्च ये अलकास्त एवालयः तैः ह्रीता लज्जिताः २८

श्रीकृष्णो नु भवतीत्यवधार्य सस्त्रीरत्नं स्त्रीषु रत्नं श्रेष्ठां रतिं तत्सहितं २९ ३० सुतं स्मरन्त्याह कोन्वा-
यमिति नरवैडूर्यः पुरुषश्रेष्ठः ३१ एतेन तुल्यं वयो रूपं च यस्य स स भवेदिति ३२ तस्य स्वपुत्रत्वे

अवधार्य शनैरीषद्धैलसत्प्रेन योषितः उपजग्मुः प्रमुदिताः सस्त्रीरत्नं सविस्मिताः २९
अथ तत्रासितापांगी वैदर्भी वल्गुभाषिणी अस्मरत्स्वसुतं नष्टं स्नेहस्नुतपयोधरा ३० को
न्वयं नरवैडूर्यः कस्य वा कमलेक्षणः धृतः कया वा जठरे केयं लब्धा त्वनेन वा ३१ मम चाप्या
त्मजो नष्टो नीतो यः सूतिकागृहात् एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित् ३२ कथं त्वा
नेन संप्राप्तं सारूप्यं शार्ङ्गधन्वनः आकृत्यावयवैर्गत्या स्वरहासावलोकनैः ३३ स एव वा
भवेन्नूनं यो मे गर्भे धृतोऽर्भकः अमुष्मिन्प्रीतिरधिका वामः स्फुरति मे भुजः ३४ एवं मीमां
समानायां वैदर्भ्यां देवकीसुतः देवक्यानकदुंदुभ्यामुत्तमश्लोक आगमत् ३५ विज्ञातार्थो
ऽपि भगवांस्तूष्णीमास जनार्दनः नारदोऽकथयत्सर्वं शंबराहरणादिकं ३६ एव तेन नयः
सम्बुद्धताश्चवस्मागतः हृतो येनाबलो बालो भवत्याः सूतिकागृहात् अयं मायावती भार्या त
नयस्य व तेसती मन्मथे तु गते नाशं तद्भवप्रतायणा शंवरं मोहयामास समायारूपेण रुक्मि
णि सोयं कामोऽवतीर्णस्त्वेन स्येयं रतिपिता रतिः नक्रु नाम महदाश्चर्यं कृष्णांतःपुरयोषितः
अभ्यनंदन्बहूनब्दान्नष्टं मृतमिवागतं ३७ देवकी वसुदेवश्च कृष्णरामौ तथा स्त्रियः दंप

संभावयंत्याह कथं त्विति ३३ न देवाधिकं संभावयति स एवेति ३४ देवक्यानकदुंदुभ्यां देवा-

प्रति सोऽहं यैणा प्रद्युम्नमनुवर्णयतियमिति पिताश्रीकृष्णस्तस्य रूपे प्रद्युम्ने तिजग्राम्यीयधीश्च भ
भा० र्त्तेति भावो भावनायासां तास्तस्मान्नरः कुसपत्न्योपि रहसि निरूढभावाः सत्योयमसजनि तियतन
१० नवलविच्चेकथं सति स्मरेस्मर्यमाणातेन वलोभकेकामे प्रति विषये सति किं चरमास्पदं कृष्णस्तस्य
२२ बिंबस्तिस्तस्य बिंबे प्रतिबिंबे पुत्रे तन्न दाकिमुवक्तव्यं अन्यनार्यो भेजुरिति ४० ॥इति श्री-दशमेपंचपं

यं वै समूहः पितृसरूपनिजेणभावास्तस्मान्नरोयदभजन्नहरूढभावाः चित्रं न ततनवलरम्यस
दृबिंबबिंबे कामे स्मरेति विषये किमुतान्यनार्यः ४० ॥इति श्रीभागवते महापुराणे दशमस्कं
धे पंचपंचाशत्तमः ॥ श्रीशुकउवाच॥ सत्राजितः स्वतनयां कृष्णाय कृतकिल्विषः स्यमंतकेन म १
णिना स्वयमुद्यम्य दत्तवान् १ ॥राजोवाच॥ सत्राजितः किमकरोद्ब्रह्मन्कृष्णस्य किल्विषं १
स्यमंतकः कुतस्तस्य कस्माद्दत्ता सुता हरेः २

चाशत्तमः ॥ षट्पंचाशत्तमे मिथ्याभियोगे मणिमाहरन् कन्यां जांबवतः प्राप कृष्णः सत्राजितस्त
तः १ पुत्रादिकामसौख्यस्य निष्ठामुक्त्वातिचंचलां अर्थस्यानर्थतामाह स्यमंताहरणादिना २
सत्यभामाजांबवत्योर्विवाहप्रस्तावाय स्यमंतकाख्यानमाह सत्राजित इत्यकारांतः क्वचित्तका।
रांतोप्यन्त्यानुसारेण द्रष्टव्यः कृतापराधस्तच्छांतये स्वयमेवोद्यम्य कृतामणिना सह प्रादादिति १२ २२

भक्तस्य सत्राजितः सूर्यः साम्यपि सखासीदित्यर्थः स च तुष्टस्तस्मै स्यमंतकं नाम मणिं प्रादात् प्रीतः
स्निग्धः ३ नोपलक्षितः सत्राजितोसावित्यविज्ञातः ४ दीव्यते क्रीडते सूर्योयमिति शंकिताः संतः
कथयामासुरिति ५ सूर्ये नमस्कारार्थमागतं कल्पयित्वोद्रिक्तभक्त्यावां संबोधनानि नारायणेत्यादी

श्रीशुक उवाच॥ आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा प्रीतस्तस्मै मणिं प्रादात्सूर्यस्तुष्टः
स्यमंतकं ३ स तं बिभ्रन्मणिं कंठे भ्राजमानो यथा रविः प्रविष्टो द्वारकां राजंस्तेजसा नोप
लक्षितः ४ तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः दीव्यतेक्षैर्भगवते शशंसुः सूर्यशंकि
ताः ५ नारायण नमस्तेस्तु शंखचक्रगदाधर दामोदरारविंदाक्ष गोविंद यदुनंदन ६
एष आयाति सविता त्वां दिदृक्षुर्जगत्पते मुष्णन् गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः
७ नन्वन्विच्छंति ते मार्गं त्रिलोक्यां विबुधर्षभाः ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ८
श्रीशुक उवाच॥ निशम्य बालवचनं प्रहस्यांबुजलोचनः प्राह नासौ रविर्देवः सत्राजिन्मणि
ना ज्वलन् ९ सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमंगलं प्रविश्य देवसदने मणिं विप्रैर्न्य

नि ६ गभस्तिचक्रेण रश्मिजालेन मुष्णन् प्रतिघ्नन् तिग्मगुः तीक्ष्णागावो रश्मयो यस्य सः ७
ननु देवमज्ञात्वा नमितुमाहुः नन्विति अन्विच्छंति मार्गयंते अजः सूर्यः ८ बालानामज्ञानां व
चनं ज्वलन् विद्योतमाना ९ कृतानि कौतुकेनोत्सवेन मंगलानि यस्मिंस्तत् विप्रैः कृत्वा १०

भारप्रमाणं च चतुर्भिर्व्रीहिभिर्गुञ्जं गुञ्जान्पंच पणं पणान् अष्टौ धरणमष्टौ च कर्षं तांश्चतुरः पलं।
तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलाः इति मारी नाम कालमृत्युः अरिष्टमभद्रमशुभाउः

भा० उ० ४३

दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो दुर्भिक्षमार्यरिष्टानि सर्पाध्याधयोऽशुभाः न सन्ति
मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः ११ स याचितो मणिं क्वापि यदुराजाय शौरिणा नैवार्थ
कामुकः प्रादाद्याच्ञाभंगमतर्कयन् १२ तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभं प्रसेनो ह
यमारुह्य मृगयां व्यचरद्वने १३ प्रसेनं सहयं हत्वा मणिमाच्छिद्य केसरी गिरिं विशन्।
जांबवता निहतो मणिमिच्छता १४ सोऽपि चक्रे कुमारस्य मणिं क्रीडनकं बिले अपश्यन्भ्रा
तरं भ्राता सत्राजित्पर्यतप्यत १५ प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः भ्राता ममेति
तच्छ्रुत्वा कर्णे कर्णेऽजपञ्जनाः १६ भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि मार्ष्टुं प्रसेन
पदवीमन्वपद्यत नागरैः १७ हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने तं चाद्रिपृष्ठे निहतमृ।
क्षेण ददृशुर्जनाः १८ ऋक्षराजबिलं भीममन्धेन तमसावृतं एको विवेश भगवानवस्था
प्य बहिः प्रजाः १९ तत्र दृष्ट्वा मणिप्रेष्ठं बालक्रीडनकं कृतं हर्तुं कृतमतिस्तस्मिन्नवतस्थे
ऽर्भकान्तिके २० तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् तच्छ्रुत्वाभ्यद्रवत्क्रुद्धो जांबवान्बलि
नां वरः २१ स वै भगवता तेन युयुधे स्वामिनात्मनः पुरुषं प्राकृतं मत्वा कुपितो नानुभाव

वित् २२

स्वहेतवः ११ क्वापि कदाचित् अनेन भगवत्यसमर्थ्यं स्वयमप्रभोजितः प्रति सर्वो निवृत्तिवर्तकम
पि अनिष्टहेतुरेव भवतीति सूचितं १२ तदेव दर्शयितुमाह तमेकदेति मुच्य बध्वा प्रसेनः सत्रा

क्रव्यार्थे आमिषार्थे २३ अष्टविंशाहं अष्ट च विंशतिश्च दिनानि यस्मिंस्तत् अष्टविंशत्यहं विंशतिश
ब्देतिलोपश्चार्षः वज्रस्य निःपेषो निर्घातः तद्वत्परुषैर्निष्ठुरैः २४ श्रीकृष्णस्य मुष्टीनां विनिःपा
तैरंगानां तैर्विनिष्पिष्टानि विश्लथान्यंगानामूरूणि बंधनानि संधिस्थानानि यस्य सः २५ लोके को
वाऽयं मत्तो बलीयानिति विस्मितः सन्निमष्याह जाने इति सर्वभूतानां यः प्राणस्त्वं च यदोजः स

द्वंद्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव २३ आ
सीत्तदष्टाविंशाहमितरेतरमुष्टिभिः वज्रनिःपेषपरुषैरविश्रममहर्निशं २४ कृष्णमुष्टि
विनिःपातनिष्पिष्टांगोरुबंधनः क्षीणसत्वः स्विन्नगात्रस्तमाहातीवविस्मितः २५ जाने
त्वां सर्वभूतानां प्राण ओजः सहो बलं विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरं २६ त्वं हि वि
श्वसृजां स्रष्टा सृष्टानामपि यच्च सत् कालः कलयतामीशः पर आत्मा तथात्मनां २७

हो बलं इंद्रियहृदयदेहबलानि तत्सर्वं त्वमित्यहं जाने कथं तथात्वमत आह विष्णुमित्यादि २६
पुराणत्वे हेतुः त्वं हीति सृष्टानिमित्तं यच्च सत् उपादानं अतः पुराणः प्रभविष्णुत्वे हेतुः काल इति
अधीश्वरत्वमप्यत एवेत्याह ईशः पर इति न च तदस्य इत्याह आत्मनामात्मेति २७

भा० द० उ० २५

यत एवं स्मृतोऽतो मम मे इष्टदेवं रघुनाथमेव त्वमित्याह यस्येति ईषदुत्कलितः उद्दीपितो यो रोषस्तेन ये कटा-
क्षमोक्षास्तैः क्षुभिता नक्रा ग्राहास्तिमिंगिला महामत्स्याश्च यस्मिन् सोऽब्धिर्वर्त्मादिशत् दत्तवान् त-
थापि तस्मिन् येन स्वयश एव सेतुः कृतः उज्ज्वलिता दग्धा यस्येषुभिः क्षतानि विच्छिन्नानि रक्षसो दश

यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिंगिलोऽब्धिः सेतुः कृतः स्वयश
उज्ज्वलिता च लंका रक्षःशिरांसि भुवि पेतुरिषुक्षतानि २८ इति विज्ञातविज्ञानमृक्षराजानमच्-
युतः व्याजहार महाराज भगवान्देवकीसुतः २९ अभिमृश्यारविंदाक्षः पाणिना शंकरेण तं
कृपया परया भक्तं प्रेमगंभीरया गिरा ३० मणिहेतोरिह प्राप्ता वयमृक्षपते बिलं मिथ्याभि-
शापं प्रमृजन्नात्मनो मणिनामुना ३१ इत्युक्तः स्वां दुहितरं कन्यां जांबवतीं मुदा अर्हणा-
र्थं स मणिना कृष्णायोपजहार ह ३२ अदृष्ट्वा निर्गमं शौरेः प्रविष्टस्य बिलं जनाः प्रतीक्ष्य द्वा-
दशाहानि दुःखिताः स्वपुरं ययुः ३३ निशम्य देवकी देवी रुक्मिण्यानकदुंदुभिः सुहृदो ज्ञा-
तयोऽशोचन् बिलात्कृष्णमनिर्गतं ३४

ग्रीवस्य शिरांसि भुवि पेतुः स एव त्वमिति जाने २८ इति विज्ञातं विज्ञानं येन तं विज्ञानशब्दः करण-
साधनः कर्मसाधनो वा ऋक्षराजं प्रत्युक्तवान् २९ ३० वयं त्विह बह्वो बिलद्वारे प्राप्ताः तत्र मिथ्या-
भिशापं मम त्वनाम मणिना प्रमृजन् प्रमार्ष्टुमहमं त बिलमिह प्राप्त इत्यर्थः ३१ सह मणिना समर्थया
मा २२ ३३ ३४ ॥ २५

श्रीकृष्णमाप्नयेचेद्भाग्गेनामदुर्गामभजन् ३५ सचकृष्णस्तेषांप्रादुर्बभूव आसवहति पाठेश्च
सर्वदुह्रियाणितेषांप्रेष्ठइत्यर्थः कदाचेत्याशुपस्थानानन्तरयातान्नीति आदिष्टादत्तायाआशीःकृष्णे।
द्रष्टव्येतितयासहेव ३६ यदिलोकेजनाः कथंचिन्नरांतेबद्धंपुनरागातेउपलभंतेतद्वदुपलभ्यसर्वे

प्राञ्जलितंशापंतस्तेदुःखिनाद्वारकौकसः उपतस्थुर्महामायांदुर्गांकृष्णोपलब्धये ३५ ते
षांतुदेव्युपस्थानात्प्रत्यादिष्टाशिषासह प्रादुर्बभूवसिद्धार्थः सदारोहर्षयन्हरिः ३६ उ
पलभ्यहृषीकेशंमहतापुनरिहागतं सहपत्न्यामणिग्रीवंसर्वेजातमहोत्सवाः ३७ सत्रा
जितेसमाहूयसभायांराजसन्निधौ प्राप्तिंचाख्यायभगवान्मणिंतस्मैन्यवेदयत् ३८ सचा
तिव्रीडितोरत्नंगृहीत्वावाङ्मुखस्ततः अनुतप्यमानोभवनमगमत्स्वेनपाप्मना ३९ सो
नुध्यायंस्तदेवाघंबलवद्विग्रहाकुलः कथंमृजाम्यात्मरजःप्रसीदेद्वाच्युतःकथं ४० किं
कृत्वासाधुमह्यंस्यान्नशपेद्वाजनोयथा अदीर्घदर्शनंक्षुद्रंमूढंद्रविणलोलुपं ४१ दास्ये
दुहितरंतस्मैस्त्रीरत्नंरत्नमेवच उपायोयंसमीचीनस्तस्यशान्तिर्नचान्यथा ४२ एवंव्यव

जातमहोत्सवाआसन्निति ३७ ३८ पाप्मनाअपराधेनानुतप्यमानः ३९ अघंदोषंआत्मनोरजःम
लंअपराधमिति ४० किंकृत्वाकस्मिन्कृतेइत्यर्थः साधुभद्रं अदीर्घदर्शनंअविचारकंमांदृष्ट्वा
कृपणंमूढंमेदमतिं ४१ एवंध्यायन्नुपायंनिश्चिनोति दास्यइति स्त्रीरत्नंदुहितरंतावद्दास्यामि।

भा· द· उ· २५

बहुभिः कृतवर्मादिभिः ४४ मणिं न प्रतीच्छामः न स्वीकुर्मः देवः सूर्यः तद्भक्तस्येति कदाचित्फलभा
गिन इति तवापुत्रत्वात्तदीयं धनमस्माकमेवेति गूढोभिप्रायः ४५ ॥ दशमे षट्पंचाशत्तमः ॥ स·
सप्तपंचाशत्तमे तु पुनः शतधन्ववधे प्राप्ते स्मर्तुर्येणोमार्षि कृष्णोः कृताहतोमणेः १ अक्रूरस्य रति·
कृत्यमणेः पात्रमथाच्युतः ३ एवमग्रे तमेकांते सत्यभामोपगाढ्ह्वयं २ सत्राजितः कृष्णाय तामभगाफ

तां सत्यभामां भगवानुपयेमे यथाविधि बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां ४४ भग
वानाह न मणिं प्रतीच्छामो वयं नृप तवास्तां देवभक्तस्य वयं तु फलभागिनः ४५ ॥ इति श्री
भागवते महापुराणे दशमस्कंधे स्यमंतकोपाख्याने षट्पंचाशत्तमोध्यायः ॥ श्रीशुक उवाच ॥
विज्ञातार्थोपि गोविंदो दग्धानाकर्ण्य पांडवान् कुंतीं च कुल्यकरणे सहरामो ययौ कुरून् १
भीष्मं कृपं सविदुरं गांधारीं द्रोणमेव च तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः २ ल
ब्ध्वैतदंतरं राजन् शतधन्वानमूचतुः अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ३ योस्मभ्यं सं
प्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः कृष्णायादान्न सत्राजित् कस्माद्भ्रातरमन्वियात् ४ एवं भि
न्नमतिस्ताभ्यां सत्राजितमसत्तमः शयानमवधील्लोभात् स पापः क्षीणजीवितः ५

लोकव्यक्तीकर्तुमाह विज्ञातार्थोपीति पांडवा विलद्वारेण जतुगृहान्निर्गता इत्येवं विज्ञातोर्थो येन ।
सः कुंतीं च दग्धामाकर्ण्य कुल्यकरणे कुलोचितव्यवहारार्थं १ अन्येषां तद्दाहदुःखाभावाद्भी ।
ष्मादीन् संगम्येत्युक्तं २३ ननु जीवन् सत्राजित् कथं मणिं दास्यतीति तत्राहतुः योस्मभ्यमिति भ्रातरं
प्रसेनं मृतं कस्मान्नान्वियान्नानुगच्छेत् म्रियतामित्यर्थः ४ ॥ २५

तमिवानजगाम ६ ११ हेलनंप्रतिकूलं वृजिनंअपराधं १२ अथीतोऽस्तः समदशसंख्योका
नसंयुगान् १३ १४ नोरामकृष्णोएकमेवनतमित्यभिप्रेत्याह यइदमिति अजयामाययामोहि
तैर्गणांविक्रोशमानानांक्रंदंतीनामनाथवत् हत्वापशून्सौनिकवत्मणिमादायजग्मिवान्
६ सत्यभामाचपितरंहतंवीक्ष्यशुचार्पिता व्यलपत्तातताततिहाहतास्मीतिमस्वती ७
तैलद्रोण्यांमृतंप्रास्यजगामगजसाह्वयं कृष्णायविदितार्थायतथाचख्यौपितुर्वधं ८ त
दाकर्ण्येश्वरौराजन्ननुसृत्यनरलोकतां अहोनःपरमंकष्टमित्यस्राक्षौविलेपतुः ९ आगा
त्यभगवांस्तस्मात्सभार्यःसाग्रजःपुरं शतधन्वानमारेभेहंतुंहर्तुंमणिंततः १० सोपिकृ
ष्णोद्यमंज्ञात्वाभीतःप्राणपरीप्सया साहाय्येकृतवर्माणमयाचतसचाब्रवीत् ११ नाहमीश्व
रयोःकुर्यांहेलनंरामकृष्णयोः कोनुक्षेमायकल्पेततयोर्वृजिनमाचरन् १२ कंसःसहानुगो
पीतोयद्द्वेषात्त्याजितःश्रिया जरासंधःसप्तदशसंयुगान्विरथोगतः १३ प्रत्याख्यातःसचाक्रू
रंपार्ष्णिग्राहमयाचत सोप्याहकोविरुध्येतविद्वानीश्वरयोर्बलं १४ यइदंलीलयाविश्वं
सृजत्यवतिहंतिच चेष्टांविश्वसृजोयस्यनविदुर्मोहिताजया १५ यःसप्तहायनःशैलमु
त्पाट्यैकेनपाणिना दधारलीलयाबालउच्छिलींध्रमिवार्भकः १६ नमस्तस्मैभगवतेकृष्णा
याद्भुतकर्मणे अनंतायादिभूतायकूटस्थायात्मनेनमः १७ प्रत्याख्यातःसतेनापिशतधन्वा
महामणिं तस्मिन्न्यस्याश्वमारुह्यशतयोजनगंययौ १८ गरुडध्वजमारुह्यरथंरामजना।
ताजयेतिसेषिगार्थः १५ १६ १७ अनंतायेतिकूटस्थनिर्विकारः तस्मिन्अक्रूरेमणिंन्यस्येत्ययोग्यत्वाय

शतयोजनगामिनाततः परंगंतुमशक्तस्तत्रपतितः तेहयंविसृज्य २० अचिनोत्अन्वेषयामास अक्रूरे
मणिरस्तीतिसर्वंतेनयाविदितापिरामवंचनायतथाकृतवानितिभावः २१ २२ अन्वेषअन्वि॰ २३
सर्वंतस्यैवंचेष्टितमहंचनायेतिमत्वागूढमन्युराह अहमिति २४ २५ कतिचित्समाः संवत्सरान्

मिथिलायामुपवनेविसृज्यपतितंहयं पद्भ्यामधावत्संत्रस्तः कृष्णोप्यन्वद्रवद्रुषा २० पदा
तेर्भगवांस्तस्यपदातिस्तिग्मनेमिना चक्रेणशिरउत्कृत्यवाससोर्व्यचिनोन्मणिं २१ अल॰
ब्धमणिरागत्यकृष्णआहाग्रजांतिकं वृथाहतः शतधनुर्मणिस्तत्रनविद्यते २२ ततआहब
लोनूनंसमणिः शतधन्वना कस्मिंश्चित्पुरुषेन्यस्तस्तमन्वेषपुरंव्रज २३ अहंविदेहमिच्छा
मिद्रष्टुंप्रियतमंमम इत्युक्त्वामिथिलांराजन्विवेशयदुनंदनः २४ तंदृष्ट्वासहसोत्थायमैथि
लः प्रीतमानसः अर्हयामासविधिवदर्हणीयंसमर्हणैः २५ उवासतस्यांकतिचिन्मिथिला
यांसमाविभुः मानितः प्रीतियुक्तेनजनकेनमहात्मना ततोशिक्षद्गदांकालेधार्तराष्ट्रः सु
योधनः २६ केशवोद्वारकामेत्यनिधनंशतधन्वनः अप्राप्तिंचमणेः प्राहप्रियायाः प्रियकृद्वि
भुः २७ ततः सकारयामासक्रियाबंधोर्हतस्यवै साकंसुहृद्भिर्भगवान्यायाः स्युः सांपरायि
काः २८ अक्रूरः कृतवर्माचश्रुत्वाशतधनोर्वधं व्यूषतुर्भयवित्रस्तौद्वारकायाः प्रयोजकौ

प्रासंगिकमाहकेशवइति २७ बंधोः सत्राजितः सांपरायिकाः पारलौकिकाः २८ व्यूषतुः द्वार॰
कायाः सकाशात्क्वापिपलायितौ प्रयोजकौमणिहरणेशतधन्वनः प्रवर्तकौतत्रअक्रूरः कृ॰
ष्णानुमतेनैवगतः कृतवर्मातुभक्तपक्षपातप्राकट्यभयाद्द्विधोपेक्षितः इतिगम्यते कथमन्य॰

तदेवं श्रीवाराणस्यां दानपतिसमाख्ययामणिहस्ते क्रूरे रुक्मवेदिकैर्महाध्वरैर्यजमाने निवसति पुनः
श्रीकृष्णेनैव प्रेषितोऽक्रूर इति कर्णाकर्णि जपति जने सत्यभामारामादीनामप्यविश्वासे जनसंग्रहा।
याक्रूरमाहूय सादरं श्रीकृष्णः प्राह इदं च भगवन्मतं संगोप्यं केचन वर्षयोऽन्यकारणमक्रूरानयने
वर्णयंति तद्यथा अक्रूरे तद्वर्षयति तमन्ववदति अक्रूरे प्रोषित इति २९ वर्षयति रागोति अग्राहे राजन्।
श्रीकृष्णमाहात्म्यविस्मृत्येति तदेवाह मुनिवास इति मुनीनां निवासो यस्मिन्स मुनिवासः श्रीकृष्णः

अक्रूरे प्रोषितेऽरिष्टान्यासन्वै द्वारकौकसां शारीरमानसास्तापा मुहुर्दैविकभौतिकाः २९ त
तोऽपृच्छद्धरिर्दृष्ट्वा उग्रसेनपुरोगमान् कस्मादिहारिष्टान्यासन्न चलन्स चिरेण नः ३० इत्यंगोप
दिशंत्येके विस्मृत्य प्रागुदाहृतं मुनिवासनिवासे किं घटेतारिष्टदर्शनं ३१ देवेवर्षति काशीशः
श्वफल्कायागताय वै स्वसुतां गांदिनीं प्रादात्ततोवर्षत्स्म काशिषु ३२ तत्सुतस्तत्प्रभावोसा
वक्रूरो यत्र यत्र ह देवोभिवर्षते तत्र नोपतापा न मारिकाः ३३ इति वृद्धवचः श्रुत्वा नैतावदिह
कारणं इति मत्वा समानाय्य प्राहाक्रूरं जनार्दनः ३४ पूजयित्वाभिभाष्यैनं कथयित्वा प्रियाः
कथाः विज्ञाताखिलचित्तज्ञः स्मयमान उवाच ह ३५ ननु दानपते न्यस्तस्त्वय्यास्ते शतधन्वना

स्कं॰ ना॰ कौ॰ म॰ श्रीमा॰ टि॰ ३६
हित॰ पूर्वेम॰ वन॰

तस्य निवासे सति अक्रूरप्रवासमात्रेणारिष्टदर्शनं किं घटेत न दिष्टौ विना न घटेतेत्यर्थः ३१ पुनस्तन्मा।
तमेवान्ववर्णयंति काशिदेशेषु देवे मघवति अवर्षति सति ३२ इत्येवं स्वजनमक्रूरमहिमप्रतिपादन
परं वृद्धानां वाक्यं श्रुत्वा सत्यमेवं तथाप्येतावदेव कारणं न भवति किं तु मणेरप्यपारमिति मत्वेत्य
तदेतं परमतं ३४ विज्ञातमखिलं येन स चासौ अत एव चित्तज्ञश्चेति भावः महाभागवतस्यास्य

यादेतेषिमणवेदानासोवस्मादहुगेमसिनासेदैवागनहुसितहेतेसि ३५ ३६

भा॰ द॰ ५२

ततः किमतस्याह सत्राजित इति अपः पिंडांश्च निनीय दत्त्वा ऋणं च विमुच्य अपाकृत्य शेषितमवशि-
ष्टं दायं दुहितुः सत्यभामायाः सुता हरेयुरिति शास्त्रं तथाच स्मरंति पत्नी दुहितरश्चैव पितरो भ्रात-
रस्तथा तत्सुता गोत्रजा बंधुः शिष्याः सब्रह्मचारिण इति ३७ अग्रजो पि न प्रत्येति न विश्वसितीति
३८ नास्तीति न वक्तव्यं यतः अव्युच्छिन्नाः संतता मखा वर्तंत इति ३९ आलब्धः कः हेदिस्य हृतिवा

सत्राजितोनपत्यत्वाद्गृह्णीयुर्दुहितुः सुताः दायं निनीयापः पिंडान्विमुच्यर्णं च शेषितं ३७ तथा-
पि दुर्धरस्त्वन्यैस्त्वय्यास्तां सुव्रते मणिः किंतु मामग्रजः सम्यङ्न प्रत्येति मणिं प्रति ३८ दर्श-
यस्व महाभाग बंधूनां शांतिमावह अव्युच्छिन्ना मखास्तेद्य वर्तंते रुक्मवेदयः ३९ एवं सा-
मभिरालब्धः श्वफल्कतनयो मणिं आदाय वाससाच्छन्नं ददौ सूर्यसमप्रभं ४० स्यमंतकं
दर्शयित्वा ज्ञातिभ्यो रज आत्मनः विमृज्य मणिना भूयस्तस्मै प्रत्यर्पयत्प्रभुः ४१ यस्त्वे-
तद्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमंगलं च आख्यानं पठति शृणोत्यनुस्मरे-
द्वा दुःकीर्तिं दुरितमपोह्य याति शांतिं ४२ ॥ इति श्रीभागवते दशमस्कंधे षट्पंचाशत्तमोध्या-
यः ॥ श्रीकृष्ण ॥ एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभि-
र्वृतः १ दृष्ट्वा तमागतं पार्था मुकुंदमखिलेश्वरं उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतं २

४० रजः मिथ्याभिशापं संमृज्य अपमृज्य दुर्हृदां उत्पादितमभिषेण प्रीत्या भूयस्तस्मै प्रत्यर्पितवानिति ४१ दुः-
कीर्तिं मिथ्यालोकं दुरितं चेति ४२ ॥ इति षट्पंचाशत्तमः ॥ अथ सप्तपंचाशत्तमे तु कृष्णः पंचकरेग्रहीत् का-
लिंदीं मित्रविंदां च सत्यां भद्रां च लक्ष्मणां १ कालिंदीं निजलाभाय तपः परमपेयुषीं परिणीतवान्॥

५/ विवादमिदं प्रसक्तमध्यायमत ५ प्रतिमानवश्यांति कृष्णपदलोकृष्णः सर्वोद्धृत
८ तु प्रथमः सप्तमिः २ प्रथमं द्विपयमिद्यं पंचवाद्विकामामिद २

३ ज्येष्ठयोः प्रणामं कृत्वा समेनालिंगितः कनिष्ठाभ्यामभिवंदितो बभूव ४ कृष्णा द्रौपदी बहुभार्या सत्या।
पि निंदारहिता पार्थैर्नवं स्नेहमिव गूढा परिणीता ५ ६ अतिहार्देन स्नेहेन आर्द्रे सजले ईक्षणे यस्याः तथाप
रिपक्ष्मकः परिरब्धो वाथ वयस्यैः ७ प्रेमार्द्रवैक्लव्येन तेन रुद्धः कंठो यस्याः क्लेशापाये आत्मनिदर्शनेय

परिष्वज्याच्युतं वीरा अंगसंगहृतैनसः सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ३ युधिष्ठिरस्य
भीमस्य कृत्वा पादाभिवंदनं फाल्गुनं परिरभ्याथ यमाभ्यां चाभिवंदितः ४ परमासन आसीनं
कृष्णा कृष्णमनिंदिता नवोढा व्रीडिता किंचिच्छनैरेत्याभ्यवंदत ५ तथैव सात्यकिः पार्थैः
पूजितश्चाभिवंदितः निषसादासनेऽन्ये च पूजिताः पर्युपासते ६ पृथां समागत्य कृताभिवा
दनस्तयातिहार्दार्द्रदृशाभिरंभितः आपृष्टवांस्तां कुशलं सहस्नुषां पितृष्वसारं परिपृष्टबांधवः ७ तमाह प्रेमवैक्लव्यरुद्धकंठाश्रुलोचना स्मरंती तान्बहून्क्लेशान्क्लेशापायात्मदर्शने
न ८ तदैव कुशलं नोऽभूत्सनाथास्ते कृता वयं ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ९
न तेऽस्ति स्वपरभ्रांतिर्विश्वस्य सुहृदात्मनः तथापि स्मरतां शश्वत्क्लेशान्हंसि हृदि स्थितः १०
युधिष्ठिर उवाच॥ किं न आचरितं श्रेयो न वेदाहमधीश्वर योगेश्वराणां दुर्दर्शो यन्नो दृष्टः कुमेधसां
११ इति वै वार्षिकान्मासान् राज्ञा सोऽभ्यर्थितः सुखं जनयन्नयनानंदमिंद्रप्रस्थौकसां विभुः १२

स्वतं भजतां क्लेशापायाय आत्मानं दर्शयतीति वा ८ ज्ञातीन्नेवं पृथ्वनो अस्मान् यदा भ्राता अक्रूरः प्रेषितः ९
ज्ञातीनिति वचनात् आत्मीयं मोहं वारयंती स्तौति न तेऽस्तीति तत्र हेतुः विश्वस्येति सुहृत् आत्मा च तस्य हे
स्थितो नाशयसि १० कुमेधसां विषयासक्तचित्तानां दृष्टोऽसि ११ सुखं अवसदिति शेषः सोऽभ्यर्थित र

भा॰ उ॰ टी॰ ५८

कालिंदीदर्शनप्रसंगमाह एकदेति अक्षयाः सायकाः ययोस्तौ तूणौ इषुधी १३ १५ राज्ञे युधिष्ठिराय मेध्या
न्नमोहान् बीभत्सुरर्जुनः १६ १७ सख्या श्रीकृष्णेन १८ २० अयं मां कामयेदिति शंकायामाह नान्य
मिति २१ आरोप्यैव तद्विद्वान् २२ प्रसंगात्तत्कालीनं चरित्रांतरमाह यदैवेति पार्थैर्यदैव संदिष्टो वि

एकदा रथमारुह्य विजयो वानरध्वजं गांडीवं धनुरादाय तूणौ चाक्षयसायकौ १३ साकं कृष्णे
न सबलो विहर्तुं विपिनं महत् बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा १४ तत्राविध्यच्छरैर्व्या
घ्रान् सूकरान्महिषान् रुरून् शरभान् गवयान् खड्गान् हरिणान् शशशल्लकान् १५ तान्निन्युः
किंकरा राज्ञे मेध्यान्पर्वण्युपागते तृट्परीतः परिश्रांतो बीभत्सुर्यमुनामगात् १६ तत्रोपस्पृ
श्य विशदं पीत्वा वारि महारथौ कृष्णौ ददृशतुः कन्यां चरंतीं चारुदर्शनां १७ तामासाद्य वरारो
हां सुद्विजां रुचिराननां पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमां १८ का त्वं कस्यासि सु
श्रोणि कुतो वा किं चिकीर्षसि मन्ये त्वां पतिमिच्छंतीं सर्वं कथय शोभने १९ ॥कालिंद्युवाच॥ अ
हं देवस्य सवितुर्दुहिता पतिमिच्छती विष्णुं वरेण्यं वरदं तपः परममास्थिता २० नान्यं पतिं वृणे
वीर तमृते श्रीनिकेतनं तुष्यतां मे स भगवान्मुकुंदोऽनाथसंश्रयः २१ कालिंदीति समाख्याता व
सामि यमुनाजले निर्मिते भवने पित्रा यावदच्युतदर्शनं २२ तथावदद्गुडाकेशो वासुदेवाय
सोऽपि तां रथमारोप्य तद्विद्वान्धर्मराजमुपागमत् २३ यदैव कृष्णः संदिष्टः पार्थानां परमाद्भु
तं कारयामास नगरं विचित्रं विश्वकर्मणा २४ भगवांस्तत्र निवसन्स्वानां प्रियचिकीर्षया ।

ज्ञापितः श्रीकृष्णः तदैव तेषां विश्वकर्मणा देवशिल्पिना नगरं कारयामास २४ किंच भगवान्निरति
शयैश्वर्यगुणवानपि अर्जुनस्य धनुरादिलाभाय सारथिरास खांडवं नाम वनं २५ २८

आततयोरातततसायकौ २६ खांडवदाहकाद्धेतोः सख्येऽर्जुनाय यस्मिन्निति सामान्यतो निर्देशः यस्मा इ-
त्यर्थः जलस्थलयोर्देशे देशे छेद भ्रमः यद्वा जले स्थलवद्वहद्दृष्टिर्यस्मिंस्तत्र जलस्थलदृक् तस्मिन्
भ्रम आसीदिति २७ २८ सुपुण्ये ऋतौ ऋक्षे च यस्मिन् २९ पंचमं मित्रविंदाविवाहमाह विंदानुविंदावि

सोऽग्निस्तुष्टो धनुरदाद्धयान् श्वेतान् रथं नृप अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः २६ मयश्च
मोचितो वह्नेः सभां सख्य उपाहरत् यस्मिन् दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः २७ स तेन समनु-
ज्ञातः सुहृद्भिश्चानुमोदितः आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः २८ अथोपयेमे कालिंदीं
सुपुण्यर्त्वृक्ष ऊर्जिते वितन्वन् परमानंदं स्वानां परममंगलः २९ विंदानुविंदावावंत्यौ दुर्योधनवशा-
नुगौ स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषेधतां ३० राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः प्र-
सह्य हृतवान् कृष्णो राजन् राज्ञां प्रपश्यतां ३१ नग्नजिन्नाम कौशल्य आसीद्राजातिधार्मिकः त-
स्य सत्याभवत्कन्या देवी नाग्नजिती नृप ३२ न तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषान् तीक्ष्णशृं-
गान् सुदुर्धर्षान् वीर्यगंधासहान् खलान् ३३ तां श्रुत्वा वृषजिल्लभ्यां भगवान् सात्वतां पतिः जगाम कौ-
शल्यपुरं सैन्येन महता वृतः ३४ स कोशलपतिः प्रीतः प्रत्युत्थानासनादिभिः अर्हणेनापि गुरु-
णा पूजयन् प्रतिनंदितः ३५ वरं विलोक्याभिमतं समागतं नरेंद्रकन्या चकमे रमापतिं भूया-
दयं मे पतिराशिषोऽनलाः करोतु सत्या यदि मे धृतो व्रतैः ३६ ॥

दाविति द्वाभ्यां आवंत्यौ अवंतीजातौ ३० षष्ठमाह नग्नजिति कौशल्य अयोध्यापतिः सत्या नाम कन्या-
ऽभवत् देवी कांतिमती नाग्नजिती पितृनाम्ना प्रसिद्धेत्यर्थः ३२ वीर्यस्य गंधमपि न सहंत इति तथाभूता-
न् खलान् दुष्टान् ३३ वृषान् जयतीति वृषजित्तेन लभ्यां ३४ प्रतिनंदितः प्रतिनंदितवान् श्रीकृष्णेन

३९ हे नरेंद्र राजन्यवंशोः क्षत्रियस्य प्रशस्तदादस्यादिप्रदाः ४० गुणानामेकमेवथामस्थानं त्वं तथाप्यतस्यस्य
नवांगे ४१ दुराधर्षेताग्रशिक्षिताः दुरवग्रहाः अपराधजाः कृताः तदाह एतेस्तितिभग्नाः भेरांप्रापाः ४२ यद्य

प्यर्चितं पुनरित्याहनारायणजगत्पते आत्मानं देवपूर्णस्य करवाणि किमल्पकः ४३ यत्पादपंक
जरजः शिरसा बिभर्ति श्रीरब्जजः सगिरिशः सह लोकपालैः लीलातनूः स्वकृतसेतुपरीप्सयेशः का
ले दधत्स भगवान्मम केन तुष्येत ४४ ॥श्रीशुक उवाच॥ तमाह भगवान्कृष्णः कृतासनपरिग्रहः ।
मेघगंभीरया वाचा सस्मितं कुरुनंदन ४५ ॥श्रीभगवानुवाच॥ नरेंद्र याञ्चा कविभिर्विगर्हिता राजन्य
वंशोर्निजधर्मवर्तिनः तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां नहि शुल्कदा वयं ४० ॥राजोवाच॥ कोन्यस्तेभ्यधिको नाथ कन्यावर इहेप्सितः गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपायिनी ४१
किं त्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ४२ सप्तैते गो
वृषा वीर दुर्दान्ता दुरवग्रहाः एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ४३ यदिमे निगृहीताः स्यु
स्त्वयैव यदुनंदन वरो भवानभिमतो दुहितुर्मे श्रियः पते ४४ एवं समयमाकर्ण्य बद्ध्वा परिक
रं प्रभुः आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान् ४५ बद्ध्वा तान्दामभिः शौरिर्भग्नदर्पान्
हतौजसः व्यकर्षल्लीलया बद्धान्बालो दारुमयान्यथा ४६ ततः प्रीतः सुतां राजा ददौ कृष्णाय
विस्मितः तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं प्रभुः ४७

दिरूमेणोक्षपाः ४४ एतानयोनिगृह्णाति तस्य कन्येति समयः कृतः सप्तधा कृत्वेति वक्ष्यमाणोयोषितो
हर्तीण्वाहं संभोगयोग्यः स्यामिति सत्योप्रत्यः सापत्न्यत्रदर्पेनार्थमात्मनः सप्तधाकरणं ४७

निष्कग्रीवाश्च ताः सर्वाः समस्ता सा युवतीनां च दासीनां च ५० नागानां नागेभ्यः शतगुणान्नवलक्षाणि
रथान् रथेभ्यः शतगुणान्नवकोटीः अश्वेभ्यः शतगुणान्नवपदातीन् ५२ यदुभिर्गोहवेश्व भगवती।
यांश्चपि सदुर्मर्षारूढयुः ५३ अस्पनः प्रयुंजानानितियावत् ५४ समभवेद्विवाहमाह श्रुतकीर्तिरि
राजपत्यश्वदिदिशः कृस्नेलब्धाप्रियंपतिं लेभिरेपरमानंदंजातश्चपरमोत्सवः ४८ शोभमेयो
नकानेदुर्गीतवाद्यहितापिषः नरानार्यःप्रमदिताः सर्वासःस्वगलंकृताः ४९ दशायेन सह
स्राणिपारिवर्हमदाद्विभुः युवतीनांत्रिसाहस्रंनिष्कग्रीवसुवाससा ५० नवनागसहस्राणि
नागाच्छतगुणानरथान् रथाच्छतगुणानश्वानश्वाच्छतगुणान्नरान् ५१ दंपतीरथमारोप्य
महत्यासेनयावृतौ स्नेहविक्लिन्नहृदयोयापयामासकोशलः ५२ श्रुतेनदुरुयुर्भूयानयं
तेपथिकम्पकां भग्नवीर्याःसदुर्मर्षायदुभिर्गोवृषैःपुरा ५३ तानस्यतःशरव्रातान्बंधुप्रिय।
कृदर्जुनः गांडीवीकालयामाससिंहःक्षुद्रमृगानिव ५४ पारिवर्हमुपागृह्यद्वारकामेत्य
सत्यया रेमेयदूनामृषभोभगवान्देवकीसुतः ५५ श्रुतकीर्तेःसुतांभद्रामुपयेमेपितृष्वसुः
कैकेयींभ्रातृभिर्दत्तांकृष्णःसंतर्दनादिभिः ५६ सुतांचमद्राधिपतेर्लक्ष्मणांलक्षणैर्युतां। =
स्वयंवरेजहारैकःसुपर्णःसुधामिव ५७ अन्याश्चैवंविधाभार्याःकृष्णस्यासन्सहस्रशः
भौमंहत्वातन्निरोधादाहृताश्चारुदर्शनाः ५८ ॥इतिश्रीभागवतेदशमस्कंधेअष्टपंचाशत्तमोऽध्यायः ५८

ति श्रुतकीर्तिर्नामयापितृष्वसातस्याःसुतांभद्रांनामकैकेयींतद्देशजां ५६ अक्षमसाह सुतांचेति
एकएवश्रीकृष्णोलक्ष्मणांजहार ५७ तस्यनिरोधोतेनधृतंतस्मात् ५८ मेकांजावतीभा॰स

भा॰दशम॰ ५८ ॥इतिश्रीभागवतेदशमस्कंधेअष्टपंचाशत्तमः ॥

[illegible]

भा. द. रु.

ऽनवस्थितमस्मै भौमं हत्वा तेनाहृता याः स्त्रीः कन्यासहस्रशः प्राप पारिजातं दिवो हरन् १ परिणीय तस्ता
भिस्तन्मनोरथपूरणैः श्रान्तानामामोक्षसौरमेतन्हृद्देषु रहस्यवत् २ येन ताः स्त्रियो निरुद्धाः स भौमः
स्व कारणेन केन कारणेन हृताः तदाचक्ष्वेति ३ इंद्रेण भौमविचेष्टितं ज्ञापितः सन्प्राग्ज्योतिषपुरं ययावित्य
न्वयः कथंभूतेन हृतं छत्रं यस्य तेन लोकपालप्रधानतादिं दूरस्य वरुणच्छत्रहरणोपितस्यैवमानमंगा.
इति तथोक्ते हृते कुंडले यस्याः सा दितिर्वपुर्माता यस्य तेन हृतममराद्रेः स्थानं मणिपर्वतं तलतणोयस्यतेन

राजोवाच॥ यथा हतो भगवता भौमो येन च ताः स्त्रियः निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः
१॥श्रीशुक उवाच॥ इंद्रेण हृतछत्रेण हृतकुंडलबंधुना हृतामराद्रिस्थानेन ज्ञापितो भौम
चेष्टितं २ सभार्यो गरुडारूढः प्राग्ज्योतिषपुरं ययौ गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमम्
३ मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतं गदया निर्बिभेदाद्रीन् शस्त्रदुर्गाणि सायकैः ४ च
क्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना शंखनादेन यंत्राणि हृदयानि मनस्विनां ५ प्राका
रं गदया गुर्व्या निर्बिभेद गदाधरः पांचजन्यध्वनिं श्रुत्वा युगान्ताशनिभीषणम् मुरः शयान उ

सत्यभामाया गृहे भगवंतमिंद्र आगत्य विज्ञापितवान् तदा तस्याः कौतुकाय तया भार्यया सह ययाविति
यद्वा तदंतरे एव तत्सुतं हनिष्यामीति हासो कृत्वा वरं दत्ते सत्यं कृते सत्यभामाया भस्मं पशावान तया
सह ययौ यद्वा नारदानीतपारिजाते कृष्णेन रुक्मिण्यै दत्ते सति कुपिता सत्यभामा तया तस्यै पारिजा
तमेव दास्यामीति श्रीकृष्णेन प्रतिश्रुतमिति हरिवंशे प्रसिद्धं तदर्थं ततो नीतवानिति तिस्रे गरुडेन या
ते कारणं गिरिदुर्गैः शिलादिभिः रूपलक्षितं जलाग्न्यनिलैः स्व सर्वतो वर्तमानैः दुर्गमं युगान्ताशनेर्ध

विष्णुश्रीमद्भागवत टीका

आविध्यातो ल्पसमहाम्ब्रादरान्वयः ८ तस्मै श्रीकृष्णाय गदां व्यमुंचत ९ इंद्रतेजसा वज्रेण प्रतिक्रि
यया हेतुभूतयामर्षं जुषः ११ पीठं पीठनामानं नृनिरगन् निरगमन् १२ निकृत्तानि शीर्षादीनि येषां

त्रिशूलमुद्यम्य सुदुर्निरीक्षणो युगांतसूर्यानललोचनोल्बणः ग्रसंस्त्रिलोकीमिव पंचभिर्मुखैर
भ्यद्रवत्तार्क्ष्यसुतं यथोरगः ७ आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः स
रोदसी सर्वदिशोंबरं महानापूरयन्नंडकटाहमावृणोत् ८ तदापतद्वै त्रिशिखं गरुत्मते हरिः
शराभ्यामभिनत्त्रिधौजसा मुखेषु तं चापि शरैरताडयत्तस्मै गदां सोपि रुषा व्यमुंचत ९ तामापतंतीं
गदया गदां मृधे गदाग्रजो निर्बिभिदे सहस्रधा उद्यम्य बाहूनभिधावतोजितः शिरांसि चक्रेण जहा
र लीलया १० व्यसुः पपाताम्भसि कृत्तशीर्षो निकृत्तशृंगोद्रिरिवेंद्रतेजसा तस्यात्मजाः सप्त पि
तुर्वधातुराः प्रतिक्रियामर्षजुषः समुद्यताः ११ ताम्रोंतरिक्षः श्रवणो विभावसुर्वसुर्नभस्वा
नरुणश्च सप्तमः पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता निरगन्धृतायुधाः १२ प्रायुंजतासा
द्य शरानसीन्गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः तच्छस्त्रकूटं भगवान्स्वमार्गणैरमो
घवीर्यस्तिलशश्चकर्त ह १३ तान्पीठमुख्याननयद्यमक्षयं निकृत्तशीर्षोरुभुजांघ्रिवर्मणः स्वा
नीकपानच्युतचक्रसायकैस्तथा निरस्तान्नरको धरासुतः १४ निरीक्ष्य दुर्मर्षण आस्रवन्मदै
र्गजैः पयोधिप्रभवैर्निराक्रमत् दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योपरिष्टात्सतडिद्घनं यथा १५
कृष्णं च तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगपत्स्म विव्यधुः तद्भौमसैन्यं भगवान्गदाग्रजो वि

तान् १४ शतघ्नीं शक्तिविशेषं १५ विचित्रा वाजाः पत्राणि येषां तैर्बाणैः निकृत्ता बाहवः ऊरवः शिरोध्रा

अन्यान्यप्यर्थे कुरूद्वह हे इति संबोधनं तथा हि तैर्यानि प्रयुक्तानि शस्त्रास्त्राणि तन्यापि पूर्वमेव तानि सर्वैः सैन्यं ह
भा॰ तावच्छस्त्राणि तान्यस्त्राणि शस्त्राणि विच्छेद तत्राप्येकैकं शस्त्रमस्त्रं च त्रिभिस्त्रिभिः शरैरित्यप्यर्थे १७ किं
द॰
११

यानि योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः ।
ऊह्यमानः सुपर्णेन पक्षाभ्यां निघ्नता गजान् १७ गरुत्मता हन्यमानास्तुण्डपक्षनखैर्गजाः ।
पुरमेवाविशन्नार्ता नरको युध्ययुध्यत १८ दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकं तं भौमः
प्राहरच्छक्त्या वज्रः प्रतिहतो यतः १९ नाकंपत तया विद्धो मालाहत इव द्विपः शूलं भौ ।
मोऽच्युतं हन्तुमाददे वितथोद्यमः २० तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः अपाहरद्गज
स्थस्य चक्रेण क्षुरनेमिना २१ सकुंडलं चारुकिरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वल
न् हाहेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुंदं विकिरंत ईडिरे २२ ततश्च भूः कृष्णमुपे
त्य कुंडले प्रतप्तजांबूनदरत्नभास्वरे सवैजयन्त्या वनमालयार्प्ययत् प्राचेतसं छत्रमथो म
हामणिं २३ अस्तौषीदथ विश्वेशं देवी देववरार्चितं प्रांजलिः प्रणता राजन् भक्तिप्रव
णया धिया २४ ॥

च गरुत्मेति १८ यतः यया शक्त्या वज्रः प्रतिहतः आस १९ गरुडस्तु नाकंपत गरुडे वितथोद्यमः २१
सन् प्रतप्तजांबूनदेया निरत्नानि तैर्भास्वरे मे वै शाम्भू जमंदः शिरश्छत्रं महामणिं चार्पयदिति २४

ऐश्वर्यज्ञानान्नाभिः स्तौति नमस्त इति परमात्मन् देवाद्यंतर्यामिन् येन मंत्रेण तुष्टात्याः प्रसन्नः पूर्वमासीत् तेन मं-
त्रेण नमस्यति पंकजं नाभौ यस्य तस्मै जगत्कारणायेत्यर्थः अत एव सर्वकीर्तिमयी पंकजमाला विद्यते यस्य
तस्मै एवं भक्तध्यायतां पंकजवत्संप्रसन्नेन तापोपशमनेन नेत्रे यस्य तस्मै पंकजवत्सुसेव्यौ पंकजाकृती वां-
घ्री यस्य तस्मै नमः इति २५ किंच भगवते निरतिशयैश्वर्यादिषवासुदेवाय सर्वभूताश्रयाय अतो विष्णवे व्या-
पिने न हि सर्वभूताश्रयत्वं परिच्छिन्नस्य संभवतीति कुतः सर्वाश्रयत्वं पुरुषाय सर्वस्मात्कार्यात्पूर्वमेव सते

॥अदितिरुवाच॥ नमस्ते देवदेवेश शंखचक्रगदाधर भक्तेच्छोपात्तरूपाय परमात्मन्नमोऽस्तु ते २६
नमः पंकजनाभाय नमः पंकजमालिने नमः पंकजनेत्राय नमस्ते पंकजांघ्रये २७ नमो भ-
गवते तुभ्यं वासुदेवाय विष्णवे पुरुषायादिबीजाय पूर्णबोधाय ते नमः २८ अजाय जनयित्रेऽस्य
ब्रह्मणेऽनंतशक्तये परावरात्मन् भूतात्मन् परमात्मन्नमोऽस्तु ते २९

पूर्वमेवाहमिहासमिति तत्पुरुषत्वमिति श्रुतेः एतदपि कुतः आदिबीजाय आदेर्जगत्कारणस्यापि कार-
णाय एवमपि न महदादिवज्जाड्यमित्याह पूर्णबोधायेति २८ नन्वेवमपि सकारणत्वात् पूर्वं सत्वेन स्याद-
त आह अजायेति स्वयमजाय अन्यस्य च जनयित्रे अस्य यत्रापि क्रमेण हेतुद्वयं ब्रह्मणे बृहते अनंत-
शक्तये इति च बृहत्त्वादजत्वं अनंतशक्तित्वाज्जनयितृत्वमित्यर्थः ननु पित्रादयः पुत्रादीनां जनकास्ते-
षां च तत्र पूर्वं तेषां च भूतानि तेषां च स्वकर्मद्वारेण जीवाः किमत्राहेत्यत आह परावरात्मन्नित्यादि पित्रा-
द्यात्मतया त्वमेव जनक इत्यर्थः २९

भा० द० उ० २२

ननु गुणा विक्षोभ्यत्वादिहेतवः ते च प्रधानस्यैव न तस्य च पुरुषः क्षोभकः तत्र च कालो निमित्तमिति प्रसिद्धं किं
मत्राहुस्त्वेवात्तिनमसोयारणोयसंवृत एव स्थानाय पालनाय जगतः स्रष्टा यद्यं ऽकर्दमजमाद्रिमेव वि।
मर्षिं सृजसीत्यर्थः कालप्रधानपुरुषाणां त्वद्व्यतिरिक्तानां सत्त्वं तु परः सर्वव्यतिरिक्तः अतस्त्वमेव जन
यितेत्यर्थः ३ कार्यकारणप्रपंचस्य तद्व्यतिरेकं न स्य च सर्वव्यतिरेकमुपपादयति अहमिति अहंभ
मिः मात्राणीति देवा मन इति इंद्रियाणीति च त्रिविधाहंकारकार्याणि कर्तोऽहंकारः ४ एवं स्तुत्वा प्रा
र्थ तं वै सिसृक्षू रजः कंठप्रभो न मो निरोधाय विभर्ष्यसंवृतः स्थानाय सत्त्वं जगतो जगत्पते कालः प्र
धानं पुरुषो भवान्परः ५ अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इंद्रियाणि च कर्ता
महानित्यखिलं चराचरं त्वय्यद्वितीये भगवन्नयं भ्रमः ६ तस्मात्सुजोऽयं तव पादपंकजं भीतः
प्रपन्नार्तिहरोपसादितः तत्पालयैनं कुरु हस्तपंकजं शिरस्यमुष्याखिलकल्मषापहं ॥श्लोक॥
इति भूम्यार्थितो वाग्भिर्भगवान्भक्तिनम्रया दत्वाभयं भौमगृहं प्राविशत्सकलर्द्धिमत् २२
तत्र राजन्यकन्यानां षट्सहस्राधिकायुतं भौमाहृतानां विक्रम्य राजभ्यो ददृशे हरिः २३
ते प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः मनसा वव्रिरेऽभीष्टं पतिं दैवोपसादितं २४ भय्यान्य
र्थं पतेन स्यैति हे प्रपन्नार्तिहर तस्य नरकस्य अयं भगदत्तो नाम भीतः अत एव मया तव पादपंकजमुपसा
दितः अभयं दत्त्वा प्राग्ज्योतिषकमित्यपि ज्ञातं यथाह पराशरः कन्यापुरे स कन्यानां षोडशानां तु लवि
क्रमः प्राग्ज्योतिषकानि दृश्ये सहस्राणि महामना इति राजभ्य इत्युपलक्षणं सिद्धादिभ्यश्चेति तथाहि
तेनैवोक्तं देवसिद्धासुरादीनां नृपाणां च जनार्दनः हृतानि हि महीपुत्रः कन्यारत्नानि मंदिरे २५

२२

प्राह्णिणोत्सर्जयामास सहस्रशः कमनीयाश्च ता विरजो वराश्च ताः नरयानैः शिबिकाभिः अपि च म
हाकोशानिति ३६ सप्रियः सत्यभामासहितः गृहोद्यानेन निःकुटस्थ उपशोभयति ३७ सेन्द्रान्विबुधान्नि।
र्जित्येतीन्द्रकृष्णयोः संग्रामश्रुतः ३८ न च कथं प्रसाधितस्वमनोरथेन श्रीकृष्णेन महेन्द्रस्य संग्रामरत्या
ग्रंथाहृययाचरति अच्युतेऽर्थं साधनमिति च कर्मद्वयं याचलिथा ताः विगृह्यते विग्रहं करोति महा

नाः प्राह्णिणोऽप्सुरवतीं समस्तु विरजोवराः नरयानैर्महाकोशानरथ्याश्वान्दुविर्णोमहत् ३६
ऐरावतकुले भांश्च चतुर्दन्तान्स्वरश्विनः पांडुरांश्च चतुः षष्टिं प्रेषयामास केशवः ३७ गत्वा से
न्द्रं भवनं दृष्ट्वा दित्यै च कुंडले पूजितस्त्रिदशेन्द्रेण महेन्द्राण्या च सप्रियः ३८ चोदितो भार्ययो।
त्पाद्य पारिजातं गरुत्मति आरोप्य सेन्द्रान्विबुधान्निर्जित्योपानयत्पुरं ३९ स्थापितः सत्यभामा
या गृहोद्यानोपशोभनः अन्वगुर्भ्रमराः स्वर्गात्तद्गंधासवलंपटाः ४० ययाच आनम्य किरी
टकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनं सिद्धार्थ एतेन विगृह्यते महानहो सुराणां च तमो धि
गाढ्यतां ४१ अथो मुहूर्त एकस्मिन्नानागारेषु ताः स्त्रियः यथोपयेमे भगवान्तावद्रूपधरोऽव्य
यः ४२ गृहेषु तासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः रेमे रमाभिर्निजका
मसंप्लुतो यथेतरो गार्हकमेधिकांश्चरन् ४३

न पितमः क्रोधः आप्तस्तां पतिकतां यथायथावत् अनेन देवक्यादिवंदनं समागमेऽपि प्रतिगृहं योग
पद्येन सूचितः अव्ययः सर्वत्रापि संपूर्ण एव ४२ अहो भाग्यं नारीणामित्याह त्रिभिः गृहेष्विति अ
नर्घ्याणि कर्माणि करोतीति तथा सः निरस्तं साम्यमतिशयश्च येभ्यस्तेषु गृहेषु अनपायी अवस्थितः रा
माभिः लक्ष्म्यांशभूताभिः निजकामसंप्लुतः स्वानंदपरिपूर्णः गार्हकमेधिकान्गृहस्थधर्मान् ४३ ५३

भा० १० ६६

अनुरागहाससहितमवलोकं च ततः पूर्ववत् नवसंगमं च तत्कृतं तल्पं तस्मिन् लज्जा च भेजे ४३ विश्रमणार्थे
वाहनके पाशाः केशप्रसाधनं दासीनां पानानि विधानेयासां तथा भूचना अपि स्वयं विभोर्दास्यं विदधुरि
ति ४४ ॥ इति दशमे एकोनषष्टितमः॥ अथ षष्टितमे कलहः परिहासेन रुक्मिण्यां कोपयितानतः
प्रेमकलहे तामसान्त्वयत् १ रमा रामतनानं दमहोदयविरैवनैः रुक्मिण्या प्रेमकलहकृतमनेश्वर्ये।

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोपि न विदुः पदवीं यदीयां भेजुर्मुदाविरतमेधितया
यानुरागहासावलोकनवसंगमजल्पलज्जाः ४३ प्रत्युद्गमासनवरार्हणपादशौचताम्बूलवि
श्रमणवीजनगंधमाल्यैः केशप्रसारशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्मदा
स्यं ४४ ॥ इति श्रीभागवते दशमस्कंधे पारिजातहरणे नरकासुरवधएकोनषष्टितमोध्यायः ५९
श्रीबादरायणिरुवाच॥ कर्हिचित्सुखमासीनं स्वतल्पस्थं जगद्गुरुं पतिं पर्यचरद्भैष्मी व्यजनेन
सखीजनैः १ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः सहि जातः स्वसेतूनां गोपीथाय य
दुष्वजः २ तस्मिन्नंतर्गृहे भ्राजन्मुक्तादामविलंबिना विराजिते वितानेन दीपैर्मणिमयैरपि ३
मल्लिकादामभिः पुष्पैर्द्विरेफकुलनादिते जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोमलैः ४ पारि
जातवनामोदवायुनोद्यानशालिना धूपैरगुरुजै राजन्जालरंध्रविनिर्गतैः ५

मीर्यते २ स्वतल्पस्थं सपर्यैकास्थं ३ वक्ष्यमाणं रुक्मिण्याः प्रियः कृष्णेपरमं प्रेमसंभावयितुं तत्स्तोकमे
वतत्वमनुसारयतियस्त्विति २ आदौ रागवत्त्रिभिः श्लोकैर्मंदिरमनुवर्णयति तस्मिन्निति तत्र कृत्स्ना
तिप्रसिद्धमाह भ्राजंति मुक्तादामानि तेषां विलंबाः संति यस्मिन् तेन वितानेन विराजिते तन्नीयां
नानाविराजितपदे नान्वयः ३ सुगंधतया द्विरेफकुलैर्नादिते ४ प्रविष्टैश्चंद्ररश्मिभिः नि

[illegible]

पयसः क्षीरस्य फेनस्तद्वन्मृदु निपर्य्यंकस्यैकशिपूत्तमे हंसतूलिकायां उपतस्थे असेवत ६ न देवाभि-
नयनि वालव्यजनमिति ७ रुपाच्युतस्य समीपे सा मणिनूपुराभ्यां रेजे श्वा स्यवतीमणिमयौ नूपुरौ क्व-
णंतौ तत्रयोः साङ्गुलीयव्यजनानि स्यग्रहस्ते हस्ताग्रे यस्याः सावद्गीतेन रहठोऽस्थागितो कुचौतयोः कुंकुमते।
न शोणो हारस्तस्य भासा नितंवे धृतया या परार्द्ध्यमल्पा कांचीतया च रेजे ८ तां निरीक्ष्य प्रीतः स्मयमानो ह
रिराबभाषे कथंभूतो या लीलया धृततनरतनोः तस्या नुरूपं रूपा यस्य अनुरूपं रूपं यस्याः तां यथोक्तं श्रीपा।

पयः फेननिभे शुभ्रे पर्यंके कशिपूत्तमे उपतस्थे सुखासीनं जगतामीश्वरं पतिं ६ वालव्यजनमा
दाय रत्नदंडं सखीकरात् तेन वीजयती देवी उपासां चक्र ईश्वरं ७ सोपाच्युतं क्वणयती मणिनू-
पुराभ्यां रेजे साङ्गुलीयवलयव्यजनाग्रहस्ता वस्त्रांतगूढकुचकुंकुमशोणहारभासा नितंवधृतया च
परार्द्ध्यकांच्या ८ तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य या लीलया धृततनोरनुरूपरूपा प्री-
तः स्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ९ ॥श्रीभगवानुवाच॥ राज-
पुत्रीप्सिता भूपैर्लोकपालविभूतिभिः महानुभावैः श्रीमद्भिः रूपौदार्यबलोर्जितैः १० तान्प्रा-
प्तानर्थिनो हित्वा चैद्यादीन्स्मरदुर्मदान् दत्ता भ्रात्रा स्वपित्रा च कस्मान्नो ववृषेऽसमान् ११

तदाह हे देवते देवदेहेयं मनुष्यत्वे च मानुषी विस्तोर्टेहानुरूपां वै करोत्येषात्मनस्तनुमिति किं वाल-
कैः कुंडलाभ्यां निष्केणापदकेनालंकृतेन कंठेन च वक्त्रं टिलशोभितेन वक्त्रे उल्लसंती स्मितसुधा यस्य स्तां
९ सर्वगुणयुक्तायाश्रपि तव बुद्धिमेदं ग्लाप्यितु शय्येनाह राजपुत्रीत्येकादशभिः हे राजपुत्रि लोकपाला-
नामिव विभूतिरैश्वर्यं येषां तैस्तथा महाप्रभावै राज्ञौ रूपादिभिरूर्जितैः युग्मपूर्वं मीप्सितासि १० ता।

भा० टी० ३४

किंच प्रायशः राजभ्यो जनास्संयातिभ्यो विभ्यतः भयं प्राप्नुवन्तः १२ अस्य एवं स्मेनां अविज्ञानावाराणाम् अलोक
पथं अस्त्रीणाम् इतेत्रं पृथ्वीमार्गे आस्थिताः आश्रिताः १३ किंच निष्किंचना इति १४ आत्मसमं परस्य
समनुरूपं जन्मैश्वर्याभ्यां सहितम् आकृतिः रूपं जातिर्वा समा भक्त्या आयतिः १५ नदीयो समीलावि
वायोः समस्तया १६ अथ इदानीमपि १७ नहिं किमित्यालीनाहमिति चेदित्याशंक्याह चेद्येति म

राजभ्यो विभ्यतः सम्यक् समुद्रं शरणं गतान् बलवद्भिः कृतद्वेषान् प्रायस्त्यक्तरूपासनान् १२ अ
स्य एवं स्मेनां प्रसाम लोकपथमीयुषां आस्थिताः पदवीं सम्यक् प्रायः सीदंति योषितः १३ निष्किं
चनावयं शश्वन्निष्किंचनजनप्रियाः तस्मात्प्रायेण नह्याढ्या मां भजंति सुमध्यमे १४ ययोरात्म
समं वित्तं जन्मैश्वर्याकृतिर्भवः तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् १५ विदर्भे तद
विज्ञाय त्वया दीर्घसमीक्षया वृतावयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा १६ अथात्मनोनु
रूपं वै भजस्व क्षत्रियर्षभं येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे १७ चैद्यशाल्वजरासंध
दंतवक्त्रादयो नृपाः मम द्विषंति वामोरु रुक्मी चापि तवाग्रजः १८ तेषां वीर्यमदांधानां दृप्तानां
स्मयनुत्तये आनीतासि मया भद्रे तेजोपहरतासतां १९ उदासीना वयं नूनं न स्त्र्यपत्यार्थकामुकाः
आत्मलब्ध्यास्महे पूर्णा गेहयोर्ज्योतिरक्रियाः २० श्री शुक उवाच एतावदुक्त्वा भगवा
नात्मानं वल्लभामिव मन्यमानामविश्लेषात्तद्दर्पघ्न उपारमत् २१ इति त्रिलोकेशपतेस्तदा

मसोह्यिवंति १८ स्मयनत नयेगर्वापनयनाय १९ स्त्रीणां मतिरुः सहमो दासीन्यम कामतेचाहउदासी।।
नाइति गेहयोर्देहगेहयोदाहदासीनाः अतएवज्योतिरक्रियाज्योतिरक्रियाज्योतिः प्रदीपादितद्वत्सा।।

चिंतालक्षणमाह पदेति नखैरुणाश्रीः कांतिर्यस्य तेनसुजातेनकोमलेनपदासुदुःखिन्नप्रियस्य
वणाद्भयेन्याशंकयाशोकस्यनुतापस्तैर्विनष्टावुद्धिर्यस्याः स्वर्थेनिपतेनिवलयानियस्मादुस्तादेह
स्यपपातविक्लवाश्रवणायीर्यस्या २३ हास्नेहप्रौढिगांभीर्यं २४ चतुर्भुजइतिउन्यापनास्नेहस्यावक्रे
पतिमार्जनाद्यर्थे आविष्कृतचतुर्भुजात्मर्थः समस्यनिवद्य २५ अश्रुकलेअश्रुभिः शोभितेश्रुचा

पदासुजातेननखारुणश्रियाभुवंलिखंत्यश्रुभिरंजनासितैः आसिंचतीकुंकुमरूषितौस्तनौतस्था।
वधोमुख्यतिदुःखरुद्धवाक् २२ तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्तात्श्लथद्वल।
यतोव्यजनंपपात देहश्चविक्लवधियःसहसैवमुह्यन्रंभेववातविहताप्रविकीर्यकेशा
न् २३ तद्दृष्ट्वाभगवान्कृष्णः प्रियायाःप्रेमवंधनं हास्यप्रौढिमजानंत्याः करुणःसोन्वकंपत।
२४ पर्यंकादवरुह्याशुतामुत्थाप्यचतुर्भुजः केशान्समुह्यतद्वक्त्रंप्रामृजत्पद्मपाणिना २५
प्रमृज्याश्रुकलेनेत्रेस्तनौचोपहतौश्रुचा आश्लिष्यवाहुनाराजन्ननन्यविषयांसतीं २६ सांत्व
यामाससांत्वज्ञः कृपयाकृपणांप्रभुः हास्यप्रौढिभ्रमच्चित्तामतदर्हांसतांगतिः २७ ॥श्रीभगवा-
मामावैदर्भ्यसूयेथाजानेत्वांमत्परायणां त्वद्वचःश्रोतुकामेनक्ष्वेल्याचरितमंगने २८ मुखंचप्रे
मसंरंभस्फुरिताधरमीक्षितुं कटाक्षेपारुणापांगसुंदरभ्रुकुटीतटं २९

शोकाश्रुभिः २६ सांत्वयामासअनुनीतवान् २७ मामेतित्वद्वचः किंवदिष्यसीतिश्रोतुकामेनश्रोत्र
मिक्ष्वेल्यानर्मणाएवमाचरितमुक्तं २८ नतत्वतः हेअंगसंदर्शिप्रेमसंरंभेणप्रणयकोपेनस्फुरितः
कंपितोधरोयस्मिंस्तत्कटाक्षेणकटाक्षेणारुणोपांगोयस्मिंस्तत्एवंसुंदरंभ्रुकुटिलक्ष्म

३५ [illegible]

भा॰ नन्वकलहे किंकौतुकंस्यात्वेवाअतआह अयंहीति न॰॰ र्मंयामःकालः भगवतस्तस्यऐश्वर्यंयुक्तं सा।
द॰ त्वसव्रीडहासेनविरेणस्निग्धेनापांगेनवीक्ष्यमाणाअसमत्वेभयंदुर्गाश्रयसंप्रबलेःकलिःअराजत्वा।
उ॰ मविज्ञातालौकिकेहावसादने तिःकिंचनत्वंतत्प्रीतिप्रस्थानादरणीयता अतोचित्यंनिर्गुणत्वंवृ
३५ थाम्लायाचभित्वभिः औदासीन्यमकामत्वंसदोषानघोरुशासतः अत्तत्वादीर्घ्यंदर्शितेभेष्यारात्ता
वहून्नागुणानकृसत्तमौदितानभेक्ष्मीन्यषेयनह्रुणस्तवेःभगवतःसन्निदापराणीवयानिवचना।

अयंहिपरमोलाभोगृहेषुगृहमेधिनां यन्नर्मैरीयतेयामःप्रिययाभीरुभामिनि ३० श्री।
शु उ॰ च॰ सैवंभगवताराजन्वैदर्भीपरिसांत्विता ज्ञात्वातत्परिहासोक्तिंप्रियत्यागभयंज
हौ ३१ बभाषऋषभंपुंसांवीक्षंतीभगवन्मुखं सव्रीडहासरुचिरस्निग्धापांगेनभारत ३२
रु॰ उ॰ च॰ नन्वेवमेतदरविंदविलोचनाहयद्वैभवान् भगवतोसदृशीविभूम्नः क्वस्वे
महिम्न्यभिरतोभगवांस्त्र्यधीशःक्वाहंगुणप्रकृतिरज्ञगृहीतपादा ३३

निसर्वोत्कर्षंपरतयाव्याचक्षाणाप्रतिभाषते ३२ तत्रयदुक्तंकस्मान्नोववृषेसमानितितत्रासाम्यं।
सत्यमेवेत्याह नन्वेवमिति हेअरविंदविलोचनत्र्यधीशः त्रयाणांब्रह्मादीनामप्यधीशोनियंता
तस्यकाहंगुणप्रकृतिःत्रिगुणस्वभावाप्राकृतागुणमयीप्रकृतिर्वानन्वतमेवाधीश्वरीश्रीःसर्वैरु।
पास्यत्वादित्यतआह अज्ञैःसकामैर्गृहीतोपादौयस्याःसा ३३ ॥ ३५

यदुक्तंराजभ्योविभ्यतःसुमुक्षमसमुद्रेशरणंगतानितितत्राह सत्यमिति हेउरुक्रमेतिभयाभावंदर्शय।
तिराज्ञांशत्रुत्वादयएवराजेंद्रास्तिराजानस्तेभ्योभयादिवेति अत्रहेतुःयेसमुद्रेतद्दृशायेविषयाकारै
रपरिच्छिन्नइत्यर्थः श्रोत्रेनिरवलंबतयाप्रकाशतेउपलंभमात्रःचैतन्यघनआत्माभवानितिबलवद्भिः
कृतद्वेषानितियदुक्तंतदपिसत्यमित्याह नित्यमिति कदिंद्रियगणैःकृतास्तितैर्वेद्विषुस्तैरिंद्रियगणैः
वृत्यभिप्रायेणबहुवचनेकृतास्तितइंद्रियगणायेषांइतिवातैरपिनित्यंकृतविग्रहः तेषुतत्त्वाप्रतीतेः या।

सत्यंभयादिवगुणोभ्यउरुक्रमांतःशेतेसमुद्रउपलंभनमात्रआत्मा नित्यंकदिंद्रियगणैःकृ
तविग्रहस्त्वंत्वत्सेवकैर्नृपपदंविधुतंतमोंधं २४ त्वत्पादपद्ममकरंदजुषांमुनीनांवर्त्मास्फुटं
नृपशुभिर्ननुदुर्विभाव्यं यस्मादलौकिकमिवेहितमीश्वरस्यभूमंस्तवेहितमथोअनुयेभ
वंत २५

दुक्तंत्यक्तंनृपासनानितितद्युक्तमेवेत्याह त्वत्सेवकैरिति नृपाणांपदमासनंअंधंगाढंतमएवतत्त।
अविवेकबहुलत्वात्त्वत्सेवकैरेवतत्त्यक्तंकिंपुनर्वक्तव्यंत्वयात्यक्तमिति २४ अस्पष्टवर्त्मनांपुंसा
मलोकपथ्यमीयुषामितियदुक्तंतदपितथ्येवेत्याह त्वत्पादेति नृपशुभिर्नराकारैःपशुभिःकिंपु।
नर्वक्तव्यंतववर्त्मास्फुटंस्फुटमिति किंचयस्माद्येभवंतमनुवर्तंतेतेषामपीहितमलौकिकमिवा।
थोकिमुवक्तव्यंतवेश्वरस्येहितंअलौकिकमित्यर्थःआस्थितःपदवींसुमंत्रप्रायःसीदंतियोषितइ।

निश्रणपविहांरवत्यतियद्धोद्ध्येतिपंचमश्लोके २५

श्री
द
उ
३६

निष्किंचनावयंशश्वन्निष्किंचनजनप्रियाः तस्मात्प्रायेणनह्याढ्यामांभजंतिसुमध्यमे इत्येतत्श्लोकोक्तं।
दोषत्रयंपरिहरतिनिष्किंचनइतिदरिद्रतालक्षणंनिःकिंचनत्वंतत्तुनवनचरत्वात्ह यस्मादिति अन्यतोव
लिभुजःपूज्याअपिब्रह्मादयोयस्मैभवतेबलिंहरंतितत्रसर्वस्वरूपस्यभवतोदारिद्र्यंनघटतइत्यर्थः निष्किं
चनजनप्रियाइत्यत्रतत्पुरुषेणबहुव्रीहिर्मावानिंदाम्यादितिस्वयमपिभयाद्याहेतिप्रेष्ठोभवानितिबलि
भुजांब्रह्मादीनांलोकेप्राणतंप्रेष्ठः तेपितुभ्यमेवेति तस्मात्प्रायेणनह्याढ्यामांभजंतीत्यस्योत्तरंनत्वा
विदंतीति आढ्यतांधाः तामंतकंनविदंतिअसुतृप्तस्तेअसुतृपः असूनेवतर्पयंतिनत्वांभजंतीत्यर्थः ३६
बलिभुजामपिभवान्प्रेष्ठइत्यत्रहेतुवदंती ययोरेवसमंवित्तमित्यनेनोक्तमनौचित्यंपरिहरतित्वंवाइतिफलो

निष्किंचनोननुभवान्नयतोस्तिकिंचिद्यस्मैबलिंबलिभुजोपिहरंत्यजाद्याः नत्वाविदंत्यसुतृपोंतकमाढ्य
तांधाःप्रेष्ठोभवान्बलिभुजामपितेपितुभ्यं ३६ त्वंवैसमस्तपुरुषार्थमयःफलात्मायद्वांछयासुम
तयोविसृजंतिकृत्स्नं तेषांविभोसमुचितोभवतःसमाजःपुंसःस्त्रियाश्चरतयोःसुखदुःखिनोर्न ३७
त्वंन्यस्तदंडमुनिभिर्गदितानुभावआत्मात्मदश्चजगतामितिमेवृतोसि हित्वाभवद्भ्रुवउदीरितकाल
वेगध्वस्ताशिषोब्जभवनाकपतीन्कुतोन्ये ३८ त्वंपरमानंदरूपः एतस्यैवानंदस्यान्यानिभूतानि।

मात्रामुपजीवंतीतिश्रुतेः समाजःसेव्यसेवकलक्षणःसंबंधः नतुपुंसःस्त्रियाश्चमिथोरतयोःअतएवसु
खदुःखिनोः नटाकुलयोरित्यर्थः ३७ भिक्षुभिःश्लाघितानामपेत्यस्यपरिहारः त्वमितिमिः त्यक्तदंडाख्यात
न्यस्तदंडमुनिभिरितिभिक्षुपेत्यस्यपरिहारः आत्मेतियदर्थंसर्वप्रियंतस्यजगतामात्मासनस्तवरेणनदूष्येत्यर्थः
किंचआत्मदइतिवैदर्भ्यंतद्विनाप्याकृत्यादीनुत्तमीनयेतिसविशेषणकदोषद्वयंपरिहरतिहित्वेतिद्वाभ्यां
मेमयाहृतोसीत्यज्ञानपरिहारः हित्वेत्यदीनुत्तमीनापरिहारः भवतोभ्रुवःसकाशादुदीरितोयःकालस्त

स्ववेगस्तेनध्वस्ताआशिषोयेषांतान्ब्रह्मादीनपिविहायकुतोन्येवराकाइत्य
टी: ३८
३६

सात्वाने परिहृत्य गुरुषां तरंगुणवर्णनप्रदीप कोपसंरंभे सानत्रिमित्येवात्मानमापादयति जातुमिति।
सिंहो यथाप्यसृन्निद्राम्यवलिं हन्ति तथा शार्ङ्ग-धन्वनिनादेनैव जरासंधादीन्विद्राव्य मांसभागांश्रि
यं च हृतवानसितवाजयो भयाद्दधीचिं प्रपन्न इति यद्वचो भाषणं तज्जातुं मामेव यतेन ब्रवदतत्पर्थः ४ य
च्चान्यत स्तस्मत्त्वत्तनिनामित्यादिना यो नाभजन्तः सीदत्यवसादनेत्यमावहत्तमस्केन दधिमदमेवेत्या
ह यद्वाञ्छयेति यस्तव भजनं न वाञ्छया नृपोत्तमाः अंगो वेणस्य पिता वैराग्यः पृथुः जायते भरतः

जातं च वचस्तव गदाग्रज यस्तु भूपान्विद्राव्य शार्ङ्गनिनदेन जहर्थ मां त्वं सिंहो यथा स्वबलिमीश
पशून्स्वभागं तेभ्यो भयाद्यदुदधिं शरणं प्रपन्नः ३९ यद्वाञ्छया नृपशिखामणयोंगवैन्यजा
यंतनाहुषगयादय ऐक्यपत्यं राज्यं विसृज्य विविशुर्वनमंबुजाक्ष सीदंति तेनुपदवीं त इहास्थि
ताः किं ४० कान्यं श्रयेत तव पादसरोजगंधमाघ्राय सन्मुखरितं जनतापवर्गम् लक्ष्म्याल
यं त्वविगणय्य गुणालयस्य मर्त्यो सदोरुभयमर्थविविक्तदृष्टिः ४१

नाहुषो ययातिर्गयश्चादिर्येषां ते यथा ते तव पदवीं मार्गं मामाश्रितास्तत् किं सीदंति न सीदंत्येवेत्यपि तु न।
त्वदं प्राप्ता इत्यर्थः एवं च कोपावेशेनावसादनस्य परिहारात् त्वत्त्ववत्मेनामित्येतद्दानेन तयैव विद्याया।
त्रिकर्षः यच्चोक्तं अथात्मनोनुरूपमिति तत्राह ४ कान्यमिति श्लोकद्वयेन गुणानामालय।
स्य तव पादसरोजगंधं जननतापवर्गमोक्षरूपं लक्ष्म्या आलयं तत्सेव्यं महद्भिर्मुखरितं वर्णितं
आघ्राय तं अविगणय्य मर्त्यो मरणधर्मिकां सदा उरुभयं यस्यां तं अन्यं कां स्त्रीं श्रयेत सेवेत अर्थे विवि
क्तदृष्टिः सारासारविवेकत्वं त्वत्तो अन्येन न दृश्यो हीना इति यदुक्तं तदपास्तं ४१

भा० द० ३०

अतस्त्वामेवाहं ममभजमित्याह तत्तेति प्रार्थयतेस्मादिति अरणीशरणीसृतिभिर्देवतिर्यगादिभिर्जं
न्मभिः पाठांतरे अर्थवादवक्कलकर्मअवतीरित्यर्थः कथंभूतस्तवयस्त्वअनृतसंसारस्यापवर्गोना
शोयस्मात्सः भजंतमुपयातिआत्मसात्करोतितत्तवांघ्रिरितिभीतस्यहिशरणमेवानुरूपंभजनयोग्य
मतस्त्वामभजमित्यर्थः ४२ येवोक्ताराज्ञोवहवोमगधाः राजपुत्रीत्यिताभूयैलोकपालविभूतिभिरि
त्यादिनातत्रसेर्ष्यंसशापंसांगुलिभंगंचाह द्वाभ्यांतस्याःस्युरितिखरादयःकेवलंभारवाहाः गावोवलीव

पूरं

तत्वानुरूपमभजंजगतामधीशमात्मानमत्रचपरत्रचकामरूपं स्यान्मेतवांघ्रिररणंसृतिभिर्भ्र
मंत्यायोवैभजंतमुपयात्यनृतापवर्गः ४२ तस्याःस्युरच्युतनृपाभवतोपदिष्टाःस्त्रीणांगृ
हेषुखरगोश्वविडालभृत्याः यत्कर्णमूलमरिकर्षणनोपयायाद्युष्मत्कथामृडविरिंचसभा
सुगीता ४३ त्वक्छ्मश्रुरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफपित्तवातं ।
जीवच्छवंभजतिकांतमतिर्विमूढायातेपदाब्जमकरंदमजिघ्रतीस्त्री ४४

र्दाश्ववनित्यंव्यापारल्लिप्ताःश्वानत्रुत्वावमताःविडालास्तवद्भूपाणाहिंस्ताभृत्यास्तकिंकराणतयास्तस्याः
पुर्भर्तारःपतयःस्युः यस्याःकर्णपथंतत्कथानप्राप्नुयादिति ४३ तथाहितवपादाब्जमकरंदम ।
जिघ्रतीसतीयास्त्रीविमूढासाकांतोयमितिमतिर्यस्याःसाकांतमतिःजीवच्छवंभजतितत्वगादिभि ।
र्वहिःपिनद्धंछन्नंअंतर्मांसादिमयमिति ४४ रा

यदुक्तमुदासीना वयमित्यादिना तत्राह अस्त्विति यद्यपि त्वं निरपेक्षस्तथापि मम ते चरणानुरागोऽस्तु म
यि च मय्यपि नातिरिक्ता अतिशयवती दृष्टिर्यस्य तस्य आत्मन्येव रतस्य न हि तव तेन को लाभः न च चरणानु
पिविमृग्यंयद्युष्मत्पदारविंदंतदेवधिषणाश्रयः तस्मात्त्वयन्तर्हितदेवोधकूपः तस्मान्निष्क्रमिणमवि

केचनोद्बद्धवैरेणभक्त्याकेचनकामतः नतथासत्वसंरब्धाः सन्निकृष्टांसुरादयः ४३ इदमित्थ
मितिप्रायस्तवयोगेश्वरेश्वर नविदंत्यपियोगेशायोगमायांकुतोवयं ४४ तन्नः प्रसीदनि
रपेक्षविमृग्ययुष्मत्पादारविंदधिषणान्यगृहांधकूपात् निःक्रम्यविश्वशरणांघ्र्युपलब्ध
वृत्तिः शांतोयथैकउतसर्वसखैश्चरामि ४५ साध्यस्मानीशितव्येशानिःपापान्कुरुनः प्रभो
पुमान्यच्छ्रद्धयातिष्ठन्चोदनायाविमुच्यते ४६ ॥ ॥ ॥ ॥

श्वशरणारक्षितारोंघ्रिपाः वृक्षास्तेषांअंघ्रिपाः वृक्षास्तेषांअंघ्रिषुमूलेषुस्वतएवगलितैः फलादिभि
रुपलब्धामाप्तावृत्तिर्जीवकायेनसोहंशांतःसन्नएकएवचरामि अथवासर्वेषांसखायोयेमहांतस्तैः
सहयथाचरामीति ४५ कथमल्पपुण्यानामेवंभावः संभवतिइतिचेत्तर्हियथेतद्भवेत्तथास्मान
नुशिक्षयेत्याह साधीति हेप्रभोईशितव्याः सर्वेजीवास्तेषामीशायत्तवानुशासने आतिष्ठन् आश्रय ५/२
न् चोदनायाविधिनिषेधलक्षणायाः सकाशाद्विमुच्यतेनबिलुतद्भक्तोविधिकिंकरः स्यादितिभावः १०५

तदुक्तं सर्वमनुमोदयस्तां गमनकारणं संप्रपंचं कथयति आसन्निति पंचभिः ऋणीयां भार्यायां प्रथमेंतरे स्वायं
भुवमन्वंतरे ते देवाः स्तुतां वाचं यभितंय भुंमैथुनेनरमयितं उद्यतउद्युक्तं कं प्रजापतिं जहसुः उपहसितं
वंतः ४० तेनावद्यकर्मणा पापेन आसुरीयोनिमगमन् अगमन् अधुनात त्वणमेव हिरण्यकश्यपोजा
ताइत्यर्थः तेवयोगमायया ततोनीताः सेतः ४८ देवक्याउदरेजाताः हे राजन् बलेतेच कंसेन विहिंसिताः
श्री ग नु व आसन्मरीचेः षट्पुत्राऊर्णायां प्रथमेंतरे देवाः कंजहसुर्वीक्ष्य स्तुतायभितमु
यतं ४७ तेनासुरीमगन्योनिमधुनावद्यकर्मणा हिरण्यकश्यपोजातानीतास्ते योगमायया
४८ देवक्याउदरेजाताराजन्कंसविहिंसिताः सातान्शोचत्यात्मजान्स्वांस्तरमेध्यासितेंतिके ४९
इतएतान्प्रणेष्यामोमातृशोकापनुत्तये ततः शापाद्विनिर्मुक्तालोकं यास्यंतिविज्वराः ५० स्म
रोद्गीथः परिष्वंगः पतंगः क्षुद्रभुक्घृणी षडिमेमत्प्रसादेन पुनर्यास्यंतिसद्गतिं ५१ इत्युक्तातान्
समादायइंद्रसेनेनपूजितो पुनर्द्वारवतीमेत्यमातुः पुत्रानयच्छतो ५२ तान्दृष्ट्वाबालकान्
देवीपुत्रस्नेहस्नुतस्तनी परिष्वज्यांकमारोप्यमुर्ध्न्यजिघ्रदभीक्ष्णशः ५३ अपाययत्स्तनंप्रीता
सुतस्पर्शपरिस्नुता मोहितामाययाविष्णोर्यया सृष्टिः प्रवर्तते ५४ पीत्वामृतंपयस्तस्याःपीतशे
षंगदाभृतः नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ५५ तेनमस्कृत्यगोविंदं देवकीं पितरं बलं
मिषतां सर्वभूतानां ययुर्धाम दिवौकसाम् ५६ तां दृष्ट्वा देवकी देवी मृतागमननिर्गमं ...
सा वतानाम् जानाना शोचति तेचैमेतवांतिके ध्यासते ४९ लोकं देवलोकं ५० स्मरोद्गीथः स्मरसहितः
उद्गीथः स्मरतिमोदते स्मरस्येवपूर्वं कीर्तिमानितिनाम अतः कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिर
र्पयामासेत्युक्तं ५१ अयच्छत् अर्पयामास ततः ५२ ५४ अमृतत्वहेतुः गदाभृतः पीतशेषमितिना
रायणांगसंस्पर्शेन प्रतिलब्धं देवावयमित्यात्मदर्शनं यैस्ते ५५ धामदेवलोकं ५६ ॥ मम

भा॰ स्तानामागमनं निर्गमं च श्रीकृष्णस्य मायां मेने तेनैवापत्यादिरूपेण रचितां ५०।५८ अस्तं कीर्तिर्यस्य
१०.३. तस्य व्यासपुत्रैरिति बहुवचनं पूजार्थं जगतां मलं भिन्दतीति तया ततः अलं निःशेषं यथा भवति तथा
१०६ नकृष्यादिकत्रिति तदेवं मोक्षहेतुत्वं पापक्षयहेतुत्वं चोक्तं तद्वत्कानांतु सत्कीर्तिरूपं परमसुखावहं
कर्णाभरणमिति स्वयंसुखरूपतामाह किं च भगवति कृतमावेशितं चित्तं येन सततया भूत्वा तस्य दे
मधाम कालादिभयरहितं लोकं यातीति ५९ ३ ८ मेघं श्री तमः ८७ बस्त्रीतितमेदंभात्त
तेरष्टा देवकीदेवी स्तानागमननिर्गमं मेने सुविस्मिता मायां कृष्णस्य चरितां नृप ५० एवंविधा
न्यद्भुतानि कृष्णस्य परमात्मनः वीर्याण्यनंतवीर्यस्य संत्यनंतानि भारत ५८ सू ३ च यर
दसंतु श्रवणेन भवति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः जगदघभिदलं तद्भक्त
सत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ५९ ३ श्री शमेमर लु न न मपं
त्वा ति मः ८७ ग वाच ब्रह्मन्वेदितुमिच्छामः स्वसारं रामकृष्णयोः यथोपयेमे विज
यो या ममासीत्पितामही १ सूतः अर्जुनस्तीर्थयात्रायां पर्यटन्नवनीं प्रभुः गतः प्रभासमशृणोन्
मातुलेयीं सयात्मनः २ दुर्योधनाय रामस्तां दास्यतीति न चापरे तल्लिप्सुः स यतिर्भूत्वा त्रि
भद्रामर्जुनोहरत् गत्वा च मिथिलां कृष्णो नृपविप्रावनंदयत् १ पित्रोस्तज्ञानमादिशत् सुभद्रांफा
ल्गुनाय च जगाम मिथिलां कृष्णः स्वभक्तप्रियकृत्ततः २ देवकाप्रतपुत्रलाभवत् अर्जुनस्य
सुभद्रालाभो पि रामसमाति कृत्वा तद्विरुद्ध मितिमन्यमानः प्रसंगात्पृच्छति ब्रह्मन्निति कथमसृणोत्
२ दुर्योधनायेति अपरे वसुदेवादयो न दास्यंतीति तल्लिप्सुः तस्यामातुलेयीं लिप्सुः रामं व
चयितुं पूज्यतमं विदं दुर्वेषं विधाय गत इति श्लोकाह स यतिरिति ३ ॥ ॥ राम ॥ १०६

स्वार्थसाधकः कर्म्मारंभेप्सुः ४ तमातिथ्येननिमंत्र्यगृहमानीयवृत्तेनयत्कृतंहृदयोपहृतंपरिविष्टंतदैक्यं
किलाज्ञेनोबुभुजेरस्यान्वयः ५ भावेनरस्याभिप्रायेणाक्षुभितमनोदधे ६ व्रीडितापांगीसव्रीडक
टाक्षा तस्मिन्नेवन्यस्तहृदयमीक्षणाचयाया ७ अंतरेहत्तमवसरंभेप्सुःप्राप्तमिक्षुःकामेनभूम
तत्रैववार्षिकान्मासान्वासीत्स्वार्थसाधकः पौरैःसभाजितोभीक्ष्णंग्रामेणाजानतावसः ४
एकदागृहमानीयआतिथ्येननिमंत्र्यतं श्रद्धयोपहृतंभैक्ष्यसंबलेनबुभुजेकिल ५ सोपश्यत
त्रमहतींकन्यांवीरमनोहरां भीरुस्तक्षणेताचतस्याभावस्तुअमनोदधे ६ सापितंचकामे
वीक्ष्यनारीवहृदयंगम हसंतीव्रीडितापांगीतस्मिन्न्यस्तहृदयेक्षणा ७ तांपरंसमनुध्यायन्नंतः
प्रेप्सुरजेनः नलेभेसंभ्रमचित्तःकामेनातिबलीयसा ८ महत्यांदेवयात्रायांरथ्यस्याङ्गोति
गीतां जहाराणनुमतःपित्रोःहंसस्यचमहारथः ९ रथस्योधनुरादायशराञ्श्चाहंधतोभवान्
विद्राव्यकोशतांतांनांस्वभागमस्राणादिव १० तत्कृतात्क्षुभितोरामःपर्वणीवमहार्णवः गृही
तपादःहंसेनसुहृद्भिश्चानुगम्यत ११ मात्हिरणांत्याविहीणिवरवधोर्मदाबलः महाधनोप
स्करेभरयाश्चनरयोषितः १२ शुकः हंसस्यासीद्विजश्रेष्ठःश्रुतदेवइतिश्रुतः हंसैकभक्त्याश
र्णार्थःशांतःकविरलंपटः १३ सउवासविदेहेषुमिथिलायांगृहाश्रमी अनीहयागताहार्यनि
र्वर्तितनिजक्रियः १४ यात्रामात्रंत्वहरहर्दैवादुपनयत्युत नाधिकंतावतातुष्टःक्रियाश्चक्रेय
थोचितयमुत्सः प्रांगमादिसम्माननिमित्तंसुखं १६ आसमंतादुंयतःआवरणांकुर्वेतः १७ पारिवर्हा
णिवरवधोः प्रतिदेयानि १८ अनीहयाअनुद्यमेनैवागतयदाहार्यभोज्यंतेननिवर्तिताःनिजाः
क्रियायेनसः १४ यात्रामात्रंशरीरादिनिर्वाहमात्रंभोज्यंउपनयतितेप्रत्यागकृति १९ ॥ ॥

भा॰द॰ मिथिलस्यजनकस्यवंशेपोमैथिलः १६ प्रभुरेवस्वयंविदेहान्देशान्प्रययौ १७ कृष्णोव्यासः रामोभार्गवः
उ॰ ग्रहंशुकःएवमादिभिःसह १८ आनर्त्तादयोणीतास्तत्तद्देशवर्त्तिनोनरनार्यः उदारहासंस्निग्धमीक्षणंच
१०७

मि

तथातद्राष्ट्रपालोङ्गबहुलाश्वइतिश्रुतः मैथिलोनिरहंमानउभावप्यच्युतप्रियौ १६ तयोः
प्रसन्नोभगवान्दारुकेणाहृतंरथं आरुह्यसाकंमुनिभिर्विदेहान्प्रययौप्रभुः १७ नारदोवाम
देवोत्रिःकृष्णोरामोसितोरुणिः अहंबृहस्पतिःकण्वोमैत्रेयश्च्यवनादयः १८ तत्रतत्रत
मायांतंपौराजानपदानृप उपतस्थुःसार्घहस्ताःग्रहैःसूर्यमिवोदितं १९ आनर्त्तधन्वकु
रुजांगलकंकमत्स्यपांचालकुंतिमधुकैकयकोशलार्णाः अन्येचतन्मुखसरोजमुदारहा
सस्निग्धेक्षणंनृपपपुर्दृशिभिर्नृनार्यः २० तेभ्यःस्ववीक्षणविनष्टतमिस्रदृग्भ्यःक्षेमंत्रिलो
कगुरुरर्थदृशंचयच्छन् शृण्वन्दिगंतधवलंस्वयशोशुभघ्नंगीतंसुरैर्नृभिरगाच्छनकै
र्विदेहान् २१ तेच्युतंप्राप्तमाकर्ण्यपौराजानपदानृपाः अभीयुर्मुदितास्तस्मैगृहीतार्हण
पाणयः २२ दृष्ट्वातउत्तमश्लोकंप्रीत्युत्फुल्लाननाशयाः कैर्धृतांजलिभिर्नेमुःश्रुतपूर्वांस्तथा
मुनीन् २३ स्वानुग्रहायसंप्राप्तंमन्वानौतंजगद्गुरुं मैथिलःश्रुतदेवश्चपादयोःपेततुःप्र
भोः २४ न्यमंत्रयेतांदाशार्हमातिथ्येनसहद्विजैः मैथिलःश्रुतदेवश्चयुगपत्संहतांजली
२५

यस्मिन्तत् दृशिभिर्नैत्रैः २० स्ववीक्षणेनैवविनष्टतमिस्रादृक्येषांतेभ्यः क्षेमंअभयंअर्थदृशंतत्त्वज्ञा श्री॰
नंच २१ अभीयुःप्रत्युजग्मुः २२ प्रीत्याउत्फुल्लान्याननानिआशयाःअंतःकरणानिचयेषांतेः कैःशि सु॰

टी॰
१०७

नदभिप्रेत्य अंगीकृत्य ततदाउभाभ्यामपिताभ्यांमद्गृहागच्छस्वगेहंयातीत्यलक्षितः अविदितःयद्वाउभाभ्यांनृपाभ्यां
तदलक्षितः ताभ्यामलक्षितइति २६ २७ उद्धर्षउद्भूतहर्षंहृदयंयस्य अस्रेणाविलेक्षणेनेत्रेयस्यसःप्रवसच
२८ ईश्वरान् ईश्वरेतत्त्वोश्रेमर्थ २९ प्रीणन्प्रीणयन्संस्पृशन्संमर्दयन् ३० आत्माचेतपिता साक्षीप्रका

भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया उभयोराविशद्गेहमुभाभ्यांतदलक्षितः २६ श्रोतुमप्यस
तांदूरान्जनकः स्वगृहागतान् आनीतेष्वासनाग्र्येषुसुखासीनान्महामनाः २७ प्रवृद्धभक्त्या उद्धर्षहृदया
स्राविलेक्षणः नत्वातदंघ्रीन्प्रक्षाल्यतदपोलोकपावनीः २८ सकुटुंबोवहन्मूर्ध्नापूजयांचक्रईश्वरान्
गंधमाल्यांबराकल्पधूपदीपार्घ्यगोवृषैः २९ वाचामधुरयाप्रीणन्निदमाहान्नतर्पितान् पादावंकग
तौविष्णोःसंस्पृशन्शनकैर्मुदा ३० राजोवाच भवान्हिसर्वभूतानामात्मासाक्षीस्वदृग्विभो अथन
स्त्वत्पदांभोजंस्मरतांदर्शनंगतः ३१ स्ववचस्तदृतंकर्तुमस्मद्दृग्गोचरोभवान् यदात्थैकांतभक्तान्मेना
नंतःश्रीरजःप्रियः ३२ स्ववचस्तदृतंकर्तुमेवंविद्विसृजेत्पुमान् निःकिंचनानांशांतानांमुनीनांयस्त्व भवान् ॰
मात्मदः ३३ सोवतीर्ण्ययदोर्वंशेनृणांसंसरतामिह यशोवितेनेतच्छांत्यैत्रैलोक्यवृजिनापहं ३४
नमस्तुभ्यंभगवतेकृष्णायाकुंठमेधसे नारायणायऋषयेसुशांततपईयुषे ३५ दिनानिकतिचिद्भू
मन्गृहान्नोनिवसन्द्विजैः समेतःपादरजसापुनीहीदंनिमेःकुलं ३६ इत्युपामंत्रितोराज्ञाभगवांलो
कभावनः उवासकुर्वन्कल्याणंमिथिलानरयोषितां ३७

शकःस्वदृक्स्वप्रकाशः अथअतःकारणात् ३१ अनंतोवंधुरपि श्रीभार्यापि अजःपुत्रोपि ३२ ३३
तच्छांत्यैसंसारोपशमाय ३४ ३५ मद्गृहानदेहेष्विसर्थः ३६ ३७ ॥

भा०द०
उ०
१०८

पुनन्वासिधामयत ३८ अवनिजेप्रक्षालितवान् ३९ ४० फलैरमलकादिभिरर्हणेनउशीरैस्तृणविशेषमूलैः
सुवासितैः शिवैरमृतवत्स्वादुभिरंबुभिः सुरभ्यामृदाकस्तूरीप्रमुखया सपर्ययापूजया यथोपपन्नया अना
यासेनसंपन्नया भूतानपहृतलब्धत्वात्सत्त्वविवर्द्धनंयदंधः अन्नंतेनच ४१ अस्यकृष्णस्यात्मामूर्तिस्तस्यनिके
तैर्भूसुरैश्च सर्वतीर्थास्पदपादरेणुभिः कृष्णादिभिर्यः संगमः सममकुतोन्वभूदिति अन्विति विस्मये यद्वा

श्रुतदेवोच्युतंप्राप्तंस्वगृहाञ्जनकोयथा नत्वामुनीन्सुसंहृष्टोधुन्वन्वासोननर्तह ३८ तृणपीठबृ
षीष्वेतानानीतेषूपवेश्यसः स्वागतेनाभिनंद्यांघ्रीन्सभार्योवनिजेमुदा ३९ तदंभसामहाभाग
आत्मानंसगृहान्वयं स्नापयांचक्रउद्धर्षोलब्धसर्वमनोरथः ४० फलार्हणोशीरशिवामृतांबुभि
र्मृदासुरभ्यातुलसीकुशांबुजैः आराधयामासयथोपपन्नयासपर्ययासत्त्वविवर्द्धनांधसा सतर्क ४१
यामासकुतोममान्वभूद्गृहांधकूपेपतितस्यसंगमः यःसर्वतीर्थास्पदपादरेणुभिःकृष्णेनचास्या
त्मनिकेतभूसुरैः ४२ सूपविष्टान्कृतातिथ्यान्श्रुतदेवउपस्थितः सभार्यस्वजनापत्यउवाचा
ङ्घ्र्यभिमर्शनः ४३ श्रु दे उ च नाद्यनोदर्शनंप्राप्तःपरंपरमपूरुषः यर्हीदंशक्तिभिःसृष्ट्वाप्र
विष्टोह्यात्मसत्तया ४४

अङ्गेति वितर्के नु इति विस्मये ४२ उपस्थितः समीपउपविष्टः भार्याभर्तृव्या
स्वजनाश्च अपत्यानिचतैःसहितः श्रीकृष्णस्यांघ्रिमभिमृशति संमर्दयतीत्यंघ्र्यभिमर्शनः ४३ यर्हीदंप्र
विष्टस्त्वंदेवदर्शनंप्राप्तइतिसएवसन्मात्रोनाद्यतनोभूतस्त्वमित्यर्थः यद्वा नः अस्मान् अद्यैवप्राप्तइतिन
किंतु तदैवप्राप्तयर्हीदंविश्वंस्वशक्तिभिःसत्त्वादिभिःसृष्ट्वास्वसत्तयाप्रविष्टस्त्वद्दर्शनंतुपरंकेवलम

१०८

मायासृष्टिप्रवेशयोरविद्यासृष्टिप्रवेशौ दृष्टान्तत्वेनाह यथेति आत्ममायया स्वाविद्ययेत्यर्थः यद्वा आत्मन
स्तव माययेति ४५ किंच शृण्वतामिति नित्यं श्रवणकीर्तनादिपराणाममलात्मनामपि हृदये वर्तमानो भासि
ममतु लोचनगोचरस्त्वं ग्रहो भाग्यमिति भावः ४६ ननु सर्वेषां हृदि स्थितः कथं केषांचिदेव हृदि भासीति
मेघैः सूर्यवत् जीवोपाधिभिरन्तरितत्वादिति यदुच्यते तर्हि न कस्यापि भयादित्यत आह हृदिस्थोपीति
कर्मभिर्विक्षिप्तचेतसो येषां तेषामात्मशक्तिभिरहंकारादिभिरग्राह्यः अतिदूरोपि उपेतगुणः प्राप्तश्रवण
कीर्तनादिसंस्कार आत्मा अन्तःकरणं येषां तेषामन्तिसमीपे अव्यवहितस्त्वमित्यर्थः ४७ एतदेव प्रपंच
यन्नमस्यति नमोस्त्विति ते तुभ्यं नमोस्तु अध्यात्मविदां निवृत्तदेहाद्यहंकाराणां परमात्मने परमात्मत्वेन

यथा शयानः पुरुषो मनसैवात्ममायया सृष्ट्वा लोकं परं स्वाप्नमनुविश्यावभासते ४५ शृण्वतां
गदतां शश्वदर्चतां त्वाभिवन्दतां नृणां संवदतामन्तर्हृदि भास्यमलात्मनां ४६ हृदिस्थोप्यतिदूर
स्थः कर्मविक्षिप्तचेतसां आत्मशक्तिभिरग्राह्योप्यन्त्युपेतगुणात्मनां ४७ नमोस्तु तेध्यात्मविदां
परात्मने ह्यनात्मने स्वात्मविभक्तमृत्यवे सकारणाकारणलिंगमीयुषे स्वमायया संवृतरुद्धदृष्टये

प्रकाशमानाय मोक्षप्रदायेत्यर्थः अनात्मने देहाद्यभिमानिने जीवाय परत्वेनाप्रकाशमानत्वात्
स्वात्मनः सकाशाद्विभक्तः समर्पितः मृत्युः संसारो येन तस्मै उक्तमेव तत्राह सकारणं महदादिका
र्यं अकारणं प्रकृतिः तदुभयलिंगमुपाधिं नियम्यतया ईयुषे प्राप्तवते अतः उभयनियन्तृः स्वस्मात्सका
शात्तदुभयवश्याय जीवाय विभक्तमृत्युरित्यर्थः नियन्तृनियम्यत्वे कारणं वदन्नाह हेतुः स्वमाय
या संवृतेति अतोलुप्तैश्वर्यत्वात्तन्नियंतेत्यर्थः नमः किंच रुद्धदृष्टये मायावित्वादेव अन्येषां रुद्धा आ
वृता दृष्टिर्येन तस्मै यद्वा स्वमायया स्वस्य असंवृता अन्येषां च रुद्धा दृष्टिर्येन तस्मै इत्येकं पदं ४८ ॥

भा॰ द॰

एवंभूतः परमेष्ठ्यात्त्वं नोऽस्मान् अस्मत्यान् शाधि अनुशाधि इत्यर्थ ४९ ५० ५१ स्वस्मिन्नादरमत्यधिकं ब्राह्मणेषु मत्स्मिवालक्ष्य लोकसंग्रहपरो भगवान् अतोऽपि ब्राह्मणेषु अतिरेकं अविति एव तमनुशास्ति ब्रह्मन्नित्यादि त्रिभिः मयानुग्रहदिष्ट्येतेन ५१ देवादिभ्योऽपि ब्राह्मणाः श्रेष्ठाः इत्याह देवा इति तेषां नैः पुनंति एतेत्सद्यः किं च देवादीनि यत्पुनंति तदप्यर्हत्तमानामीक्षया ५२ ममकलापरिकलनमुपास्तिः तयायुतः ५३ किंच

सत्वं शाधि स्वभृत्यान्नः किं देव करवामते एतदंतो नृणां क्लेशो यद्भवानक्षगोचरः ४९ श्री शुक उवाच तदुक्तमित्युपाकर्ण्य भगवान्प्रणतार्तिहा गृहीत्वापाणिना पाणिं प्रहसंस्तमुवाच ह ५० श्रीभगवानुवाच ब्रह्मंस्तेऽनुग्रहार्थाय संप्राप्तान्विद्ध्यमून्मुनीन् संचरंति मया लोकान् पुनंतः पादरेणुभिः ५१ देवाः क्षेत्राणि तीर्थानि दर्शनस्पर्शनार्चनैः शनैः पुनंति कालेन तदप्यर्हत्तमेक्षया ५२ ब्राह्मणो जन्मना श्रेयान्सर्वेषां प्राणिनामिह तपसा विद्यया तुष्ट्या किमु मत्कलया युतः ५३ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजं सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहं ५४ दुःप्रज्ञा अविदित्वैवमवजानंत्यसूयवः गुरुं मां विप्रमात्मानमर्चादाविज्यदृष्टयः ५५ चराचरमिदं विश्वं भावा ये चास्य हेतवः मद्रूपाणीति चेतस्याधत्ते विप्रो मदीक्षया ५६ तस्माद्ब्रह्मर्षीनेतान्ब्रह्मन्मच्छ्रद्धयार्चय एवं चेदर्चितोऽस्म्यद्धा नान्यथा भूरिभूतिभिः ५७ श्रीशु॰ उ॰ स इत्थं प्रभुणादिष्टः सहकृष्णान्द्विजोत्तमान् आराध्यैकात्मभावेन मैथिलश्चाप सद्गतिं ५८ एवं स्वभक्तयो राजन्भगवान्भक्तभक्तिमान् उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात् ५९ इ॰ द॰ मे षडशीति मः ८६

ब्राह्मणादयनमेव मम प्रेष्ठमित्याह नेति द्वेत माह सर्ववेदमयो विप्र इति ५४ प्रमाणाधीनत्वात्प्रमेयस्य वेदमयो विप्रो देवमयादस्माद्रूपाच्छ्रेष्ठ इत्यर्थः असूयवो दोषदृष्टयः इज्यदृष्टयः इज्यबुद्धयः ५५ अस्य विश्वस्य हेतवो भवाः महदादयः मदीक्षयामेव

सप्ताशीतितमेनाध्यायेननारदवादतः वेदैस्तुतिर्गुणातेवानिर्गुणस्यविवर्ण्यते १ वागीशायस्यवदनेल
क्ष्मीर्यस्यचवक्षसि यस्यास्तेहृदयेसंवित्तंनृसिंहमहंभजे २ संप्रदायविशुद्ध्यर्थंस्वीयनिर्बंधयंत्रितः श्रुति
स्तुतिमितव्याख्यांकरिष्यामियथामतिः ३ श्रीमद्भागवतेपूर्वैःसारतःसंनिषेविते मयातत्तदुपस्पृष्टमु
च्छिष्टमुपचीयते ४ पूर्वाध्यायांतेएवंस्वभक्तयोराजन्भगवान्भक्तभक्तिमान् उषित्वादिश्यसन्मार्गंपुन
र्द्वारवतीमगात् इत्यत्रसन्मार्गं सतांस्वतःप्रमाणभूतानामप्रामाण्यकारणरहितानांवेदानांमार्गंब्रह्म
परत्वमुद्दिश्यभगवानगादित्युक्तंतत्रवेदानांब्रह्मपरत्वमसहमानंमन्वानःपृच्छति ब्रह्मन्निति तत्रताव
न्मुख्यलक्षणागुणभेदेनत्रिधाशब्दप्रवृत्तिः मुख्यापिरूढियोगभेदेनद्विधा रूढिश्चस्वरूपेणजात्यागुणेनवा
निर्देशाद्देवदत्तादिसंज्ञासंज्ञिसंकेतेनप्रवर्तते यथाडित्थःगौःशुक्लइतिलक्षणाचेतनैवसंकेतेनाभिहि

प दिउ च ब्रह्मन्ब्रह्मण्यनिर्देश्येनिर्गुणेगुणवृत्तयः कथंचरंतिश्रुतयःसाक्षात्सदसतःपरे १

तार्थसंबंधिनि यथागंगायांघोषइति गौणीचाभिहितार्थलक्षितगुणयुक्तेतत्सदृशे यथासिंहोदेव
दत्तइति यथाहुः अभिधेयाविनाभूतेप्रवृत्तिर्लक्षणेष्यते लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टातुगौणतेति यो
गवृत्तिस्तुयतत् त्रिविधवृत्तिप्रतिपादितपदपदार्थयोः प्रकृतिप्रत्ययार्थयोर्वायोगेनयथापंकजं औपग
वःपावकइत्यादि तत्रतावत्ब्रह्मणिरूढिर्नसंभवतीत्याह साक्षात्कथंचरंतीति तत्रहेतुः अनिर्देश्यइ
ति अनिर्देश्यत्वेपिदेवदत्तवद्गुणवृत्तिंनिराकरोति निर्गुणेगुणवृत्तयइति गुणेवर्तमानाअपिनिर्गुणेकथं
चरंतीत्यर्थः निर्गुणत्वेचदेवदत्तवदनलक्षणायोगंचनिराकरोति सदसतःपरइतिकार्यकारणप्रपंचात्परस्मि
न्संगेकेनचिदपिसंबंधाभावान्नलक्षणायोगवृत्तीसंभवतइत्यर्थः एवंपदार्थत्वायोगादपदार्थस्यच

सार्थस्वतायोगात्लक्षणाकिंनरसंबंधाभावात्स्वतः

भा॰ टी॰
३॥
१९

उत्तरमाह बुद्धीन्द्रियेति बुद्ध्यादीन् प्राणांतान् जनानामनशायिनां मात्राद्यर्थं प्रभुरीश्वरोऽसृजत् मीयंत इति मात्रा विषयाः
तदर्थं च भवार्थं भवो जन्म तल्लक्षणं कर्म्मैतत्प्रभृति कर्मकरणार्थमित्यर्थः आत्मने लोकांतरगामिने आत्मनस्तत्तल्लो
कभोगायेत्यर्थः अकल्पनाय कल्पनानिवृत्तये मुक्तय इत्यर्थः अर्थधर्मकाममोक्षार्थं इति क्रमेण पदचतुष्टय
स्यार्थः जनानामिति वदन् जीवार्थमीश्वरस्य सृष्ट्यादिप्रवृत्तिरिति दर्शयति प्रभुरितीश्वरस्योपाधिवश्यताभावे
नित्यत्वं दर्शयति अयमभिप्रायः सगुणमेव गुणैरनभिभूतं सर्वज्ञं सर्वशक्तिं सर्वेश्वरं सर्वनियंतारं सर्वोपास्यं
सर्वकर्मफलदातारं समस्तकल्याणगुणनिलयं सच्चिदानंदं भगवंतं श्रुतयः प्रतिपादयंति यः सर्वज्ञः स सर्ववित् य
स्य ज्ञानमयं तपः सर्वस्य वशी सर्वस्येशानः यः पृथिव्यां तिष्ठन् पृथिव्या अंतरः सोऽकामयत अहं बहु स्यां स पन्नतनते
ज्ञोऽसृजत सत्यं ज्ञानमनंतं ब्रह्मेत्याद्यास्तथाभूतेश्वरतां तावत्संसारिणो जीवस्य तन्निवृत्तये तत्त्वमसीत्यादिवाक्या

श्री कउ॰ बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च २

निबोधयंति तत्र च तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते तच्च प्रकारांतरेणाघटमानं ब्रह्मणि पर्यवसानेन गमय
ति तथा हि न तावद्वैश्वदेव्यामिक्षेतिवदुभयोरेकार्थाभिधानेन सामानाधिकरण्यं यथोक्तं आमिक्षा देवतायु
क्तोवदन्यैवैघनहितः आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणमिति अतः भिन्नार्थत्वात् न चाजहत्स्वार्थयो
निरूढलक्षणया विशेषणविशेष्यभावेन नीलमुत्पलमितिवत् यत्सामानाधिकरण्यं यथोक्तं स्वबुद्ध्यारूप्यते येन
विशेष्येन तद्विशेषणमित्यादि अतः विरुद्धार्थत्वेन तदयोगात् न च जहत्स्वार्थत्वेन संबंधिलक्षणया कुसुमित
द्रुमा गंगेतिवत् अतः एकार्थत्वस्य विवक्षितत्वात् अतो जहदजहत्स्वार्थलक्षणया सोयं देवदत्त इतिवद्विरु
द्धांशत्यागेनाविगतचिदंशेनैकार्थ्येन सामानाधिकरण्येन निर्गुणपर्यवसाने अस्थूलादिवाक्यानां तु सादाउ
पाधिनिषेधेन तत्पदार्थशोधने उपयोगान्निर्गुणपर्यवसाने तथा चात्रैवोपक्रमे सदस्पष्टमिदमापीयेत्यादिनावि

वचनमात्रमयं व्रविषयतेनतत्त्वमसित्येवमादिषु २

शिष्टमालंबनेन वक्ष्यति अंते च श्रुतयस्तपिफलेत्यत तन्निरसनेन भव
न्निपता इत्युपसंहरिष्य उपासनादिवाक्यानां कार्यार्थप्रवृत्तस्त्वाद्यवल
ति

१९

अत्र चानादिशिष्टपरंपरागतत्वान्न संदेहो युक्त इत्याह सैषेति सैषा यथोक्ता लेवनाब्राह्मी ब्रह्मपरा श्रद्धया आदरे
ण चैतां कुतर्काद्युन्नतिमिवेशेनयः श्रवणादिना धारयेत् स अकिंचनः निरस्तदेहाद्युपाधिः सन् परं पदं प्राप्नुया
दिति ३ एतदेव सर्वं श्रुत्यर्थनिरूपणेन प्रपंचयितुमितिहासमवतारयति अत्रेति नारायणान्वितो नारा
णः प्रवक्तृत्वेनान्वितो यस्यां तां गाथामितिहासे ४ ५ ६ ७ ८ ब्रह्मसत्रमिति यथा यजमाना एव समाना ऋत्वि
गादिरूपेण यत्र कर्मेकं कुर्वंति तत्कर्म सत्रं प्रसिद्धं तथा यत्र समाना एव वक्तृश्रोतृभावेन ब्रह्म मीमांसंते तद्ब्रह्मसत्रे

सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिंचनः ३ अत्रापि ते वर्णयिष्यामि
गाथां नारायणान्वितां नारदस्य च संवादमृषेर्नारायणस्य च ४ एकदा नारदो लोकान्पर्यटन्भगवत्प्रि
यः सनातनमृषिं द्रष्टुं ययौ नारायणाश्रमं ५ यो वै भारतवर्षेस्मिन्क्षेमाय स्वस्तये नृणां धर्मज्ञानश
मोपेतमाकल्पादास्थितस्तपः ६ तत्रोपविष्टमृषिभिः कलापग्रामवासिभिः परीतं प्रणतोऽपृच्छदिदमे
व कुरूद्वह ७ तस्मै ह्यवोचद्भगवानृषीणां शृण्वतामिमं यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनां
८ श्री ग न च स्वायंभुव ब्रह्मसत्रे जनलोकेऽभवत्पुरा तत्रस्थानां मानसानां मुनीनामूर्ध्वरेतसां
श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरं ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते ९ तत्र ह्ययमभूत्प्रश्नस्त्वं मां
यमनुपृच्छसि तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः १० अपि चक्रुः प्रवचनमेकं शुश्रूषवोऽ १८
परे स द ३ च स्वसृष्टमिदमापीय शयानं सह शक्तिभिः ११ तदंते बोधयांचक्रुस्तल्लिंगैः श्रुतयः

अहो तर्हि मया कथं तन्न ज्ञातमित्यत आह श्वेतद्वीपमिति तदीश्वरं तत्रस्थं मामेवानिरुद्धमूर्तिं ९ ननु स
र्वज्ञाल्लोकस्त्वं वक्ता प्रष्टा वा तत्राह तुल्यश्रुतेति श्रुतादिभिरविशेषाः अरिमित्रोदासीनहीनत्वेन निरूप
म करुणाः अतः सर्वे प्रवचनयोग्या अपि केनापि कौतुकेन एकं प्रवक्तारं कृत्वान्ये पप्रच्छुरित्यर्थः ११ स्वसृष्टमि

भा० द०
उ०
१११

जयजयेति भोअजितजयजयउत्कर्षमाविःकुरु आदरेवीप्सा केनव्यापारेण अगजगदोकसां अगानिस्थाव
राणिजगंतिजंगमानितेओकांसिशरीराणियेषांजीवानांतेषांअजामविद्यांजहिनाशय किमितिगुणवतीहंत
व्येतिआह दोषगृभीतगुणां दोषायआनंदाद्याचरणाय गृहीतागुणायया तां हग्रहोर्भः छंदसीतिभकारः
दुर्घटदिस्वैरिणीवपरप्रतारणायगुणानुगृह्णाति अतःहंतव्या नहिमय्यपिदोषमावहेदिति ममापितत्रकाश
क्तिःस्यात अतआह त्वमिति यत् यस्मात्त्वंआत्मनास्वरूपेणैवसमवरुद्धसमस्तभगः संप्राप्तसमस्तैश्वर्योसि
वशीकृतमायत्वादितिभावः स्वयमेवतेज्ञानवैराग्यादिनाकिंनहन्तुशक्तिरित्यतआह अखिलशक्त्यवबोधकेतिते त्म २
आत्वमेवांतर्यामीसर्वशक्त्युद्बोधकः अतोनतेज्ञानादौस्वतंत्राइतिभावः अहमकंठज्ञानैश्वर्यादिगुणोजीवा

फ प श्रुः जयजयजह्यजामजितदोषगृभीतगुणांत्वमसियदात्मनासमवरुद्धसमस्तभगः अगज
गदोकसामखिलशक्त्यवबोधकतेक्वचिदजयात्मनाचचरतोनुचरेन्निगमः २४

नोकर्मज्ञानादिशक्त्यवबोधनेनाविद्यादंतेत्यत्रकिंप्रमाणमितिचेत अहमेवप्रमाणमितिआह निगमोवेदः
नत्वेवंभूतेमयिकथंश्रुतीनांप्रवृत्तिस्तत्राह क्वचिदिति कदाचित्सृष्ट्यादिसमयेअजयामाययाचरतःक्रीड
तः नित्यंचात्मप्रभगतयातेसत्यज्ञानानंतानंदैकरसेनात्मनाचरतोवर्तमानस्यनिगमोनुचरेत प्रतिपादयेत
कर्माणिविष्टौ यतोवाइमानिभूतानिजायंते योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मैतंहदेवमात्म
बुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्ये यआत्मनितिष्ठन् सत्यंज्ञानमनंतंब्रह्म यःसर्वज्ञःसर्वविदित्यादिनिगमक
दंबस्त्वामेवंभूतंप्रतिपादयतीत्यर्थः जयजयाजितजह्यगजंगमावृतिमजामनृपनीतमृषागुणां नहिभवंतमृते
प्रभवंत्यमीनिगमगीतगुणार्णवतातव २४ ॥

गम्यत्वेन ब्रह्माभासो विवर्त्तः

ननु कथं मामेव प्रतिपादयंतीति यतः इंद्रो यातोऽवसितस्य राजेत्यादिभिः इंद्रो यातो जंगमस्य अवसितस्य स्थावरस्य रा
जेति प्रपाद्यते तथा अग्निर्मूर्द्धा दिवः इत्यादिभिश्च एवंभूतत्वेनाग्न्यादयः प्रतिपाद्यंते तत्राह हृदुपलब्धमेतदिति
अयमर्थः एतदुपलक्ष्यं दृष्टमिंद्रादिकं सर्वं हृद्गतं ब्रह्मत्वमित्येवावयंति जानंतीति कथं हृद्गतमेवावशेषतयावशि
ष्यमाणत्वेन कुतः यतो हृद्गतः सर्वस्यात्मा त्वमयोः उत्पत्तिलयौ सर्वोपादानत्वात् तर्हि किं विकारित्वं हृद्गतः
कार्य्यं द्विविधमभवेत विवर्त्तरूपं च न अविकृतत्वात् विवर्ताधिष्ठानत्वेनाविकारादित्यर्थः वाशब्द उपमार्थः यथा घटादेर्विकृतेर्मृदिव उदयास्तम
यौ तद्वत् वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्रह्मेत्यादिभिस्तथा प्रतिपादनादित्यर्थः

हृदुपलब्धमेतदवयंत्यवशेषतया यतउदयास्तमयौ विकृतेर्मृदिवाविकृतात् अतऋषयो दधुस्त्व
यि मनोवचनाचरितं कथमयथा भवंति भुवि दत्तपदानि नृणाम् १५

अतः कारणात् ऋषयो मंत्रद्रष्टारो वा त्वय्येव मनोवचनाचरितं दधुः मनसा आचरितं तात्पर्यं वचनाचरितम
भिधानं च धृतवंतः न त्वन्यत्र विकारेष्वित्यर्थः अत्र निदर्शनं कथमयथेति नृणां संचरणाय यत्र कुत्रापि
दत्तानि निक्षिप्तानि पदानि भुवि कथमयथा भवंति अदत्तानि भवंति अतो यथा अश्मपाषाणेष्टकादिषु दत्ता
नि पदानि भुवं न व्यभिचरंति तथा यत्किमपि विकारजातं वदंतो वेदास्त्वामेव सर्वकारणं परमार्थभूतं प्रति
पादयंतीत्यर्थः द्रुहिणवह्निरवीन्द्रमुखामरा जगदिदं न भवेत्पृथगुत्थितं बहुमुखैरपि मंत्रगणैरजस्त्वमु
रुमूर्तिरतो विनिगद्यसे १५ ॥

भा०द० त्वमेवसर्वनिगमगोचरइतिसतांप्रहृत्यादइदयति इतितवेति त्वमेवसर्वकारणत्वेनपरमार्थइतिकृत्वाभोअधि
३० पतेत्रिगुणमायास्तरीनर्नेक हृदयोविवेकिनस्तवाखिललोकमलक्षपणकथामृताब्धिं सकलजनहृति
११२ नतिरस्तनद्वेतंकीर्तितीर्थांसिंधुमवगाह्यनिषेव्य तपांसितपंतीतितपांसिपानिदुःखोनिवाजदुः स्यकृवंतः
त्वदीयाकथामात्रेणपदापापत्यागः तदाकिमुततवकृत्ये येपुनःस्वधामविधुताशकालगुणाःस्वधाम्नास्वरू
पस्फुरणेन विधुतास्तकाआशयगुणाः अंतःकरणधर्मारागादयःकालगुणाजराद्यश्चयैस्ततथा हेप

इतितवसूरयस्त्र्यधिपतेखिललोकमलक्षपणकथामृताब्धिमवगाह्यत
पांसिजहुःकिमुतपुनःस्वधामविधुताशयकालगुणाःपरमभजंतियेपद
मजस्रसुखानुभवं १६ ॥

रमतवाजस्रसुखानुभवंआविर्ज्ञानेदानुभवंपदेस्वरूपंभजंतिसेवंते तथाभूताःदुःखानित्यजंतीतीति तय धृ
थाशुष्करपलाशन्यायेनश्लिष्यंते एवमेवविहितपापकर्मनाश्लिष्यंतेनकर्मणालिप्यतेपापकेन ततस्तकृ शुं
तेदुःकृतेविधुनुते एवंहृत्वाक्लतपति किमहंसाधुनाकरवंकिमहंपापमसंकरवमित्यादिकृतेसित्यर्थः स
कलवेदगणेरितसद्गुणस्त्वमितिसर्वमनीषिजनारताः त्वयिसुभद्रगुणश्रवणादिभिस्तवपदस्मरणेनगतक्लं ११२

सं ८ नरवपुः प्रतिपद्ययदित्वयिश्रवणवर्णनसंस्मरणादिभिः
नरहरेनभजंतिनृणामिदंदृतिवदुच्छ्वसितंविफलंततः ५

वम

अस्सूर्यानामतेलोकाअंधेनतमसावृताः तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः तथा नचेदिहावेदीम
हतीविनष्टिरित्याद्याश्रुतयः पूर्वश्लोकोक्तोभयविधभजनहीनानिंदंति दृतयइवेति अस्त्वेवंतोनराः य
दितेनविदंपतीत्यनुविधाः अनुवर्तिनोभक्ताइतियावत् तर्हिश्वसंतिजीवंतिसफलजीविनोभवंति
इतरथाहततघटइव भस्त्राइवश्वासोच्छ्वासास्त्यर्थः ननुभक्तानामपिकामादिफलमस्त्येव न कार्यकार
णानुग्राहकत्वेनजीवनहेतोस्तत्वाभजनेकृतज्ञानंतदपिनसिद्ध्येदित्याशयेनाह महदहमादयइति
महानहंकारश्चआद्यादिर्येषांते यदनुग्रहतःयस्यानुप्रवेशेनलब्धसामर्थ्याःसंतःअंडंदेह समष्टिव्यष्टि
रूपंसृष्टवंतः तत्रचपंचापिकोशानन्नमयादीनाविश्यततदाकारःसन् यःचेतयतेसत्वंतदाह पुरु
षइति पुरुषस्यान्नमयादेर्विधेवविधाआकारोयस्यसततथान्नविदेकरसस्यकथंततदाकारताअतआ
हतयइत्यस्यसंत्यस्यस्ततोयदितेनविधामहदहमादयोऽमसृजन्यदनुग्रहतः पुरुषविधोन्वयो
त्रचरमोन्नमयादिषुयःसदसतःपरंत्वमथयदेष्ववशेषमृतम् ७ ह अन्वयोत्रेति अत्रएष्वन्न
मयादिष्वन्वेतीत्यन्वयः अतःततदाकारतेति एवंतर्हिसत्यत्वमसंगत्वंचकथंतत्राह चरमोन्नमया
दिषुयइति अन्नमयादिष्वपदिश्यमानेषुयश्चरमोब्रह्मपुच्छंप्रतिष्ठेति पुच्छत्वेनोक्तःसत्वमितिसंबंधः
ननुतथाप्यन्नमयादिष्वन्वितत्वेसंगत्वमाहतिरेवतत्राह सदसतःपरंत्वमथयदेष्ववशेषमृतमिति
सदसतःस्थूलसूक्ष्मादन्नमयादेःपरंव्यतिरिक्तंतत्साक्षिभूतं अवशेषंअवशिष्यतइत्यवशेषमबाध्यं
अथयतएवअतःतत्सत्यं तर्हिकिमर्थंतेष्वन्वयउक्तःशाखाचंद्रवत्बुद्धिस्वरूपलक्षणार्थं तथाहि स
वाएषपुरुषोन्नरसमयस्तस्येदमेवशिरइत्यादिनास्थूलसूक्ष्मक्रमेण पंचकोशान्नयदिश्यतस्यपुरुष

विधतामन्वयंपुरुषविधइतिपुनःपुनस्तत्तदन्वितत्वेनालक्ष्य
ब्रह्मपुच्छंप्रतिष्ठेति सर्वसाक्षिशुद्धस्वरूपनिरूपणमित्यनव

भा०द० एवं तावत्सर्वात्मके परमेश्वरे सर्वश्रुतिसमन्वयेन सङ्गजनीयत्वमुक्त्वा अभक्तनिंदया च तदेव द्रढीकृत्येदा
उ० नीमनवगाह्यमहिमनि प्रथमं तावदुपाध्यालंबनमुपासनमाह दरं ब्रह्मेति शार्कराक्षा उपासते हृदयं ब्रह्मे
११३ त्यारुणयो ब्रह्म हैव तत ऊर्द्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्रयतेत्याद्याः श्रुतयो विदधतीत्याह उदरमुपासतइ
ति ऋषिवर्त्मसु ऋषीणां संप्रदायमार्गेषु कूर्पदृशः स्थूलदृष्टयः उदरालंबनं मणिपूरकस्थं ब्रह्मोपासते ध्यायंति
शार्कराक्षा इति श्रुतिपदस्य प्रतिपदं कूर्पदृश इति कूर्पः शर्करा रजो विद्यते दृष्टौ येषां ते तथा
रजःपिहितदृष्टयः स्थूलदृष्टय इति यावत् उदरस्य हृदयापेक्षया स्थूलत्वात् यद्वा कूर्पस्य सूक्ष्म
दृश इत्यर्थः तदा हृदयस्थं सूक्ष्ममेवालंब्य तत्प्रवेशाय प्रथममुदरस्थमुपासत इति भावः आरुण

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरं तत उदगाद
नंत तव धाम शिरः परमं पुनरिह यत्समेत्य न पतंति कृतांतमुखे १८ ॥

यस्तु साक्षात् हृदयस्थं दहरं सूक्ष्ममेवोपासते हृदयविशेषणं परिसरपद्धतिमिति परितः सरंति
प्रसर्पंतीति परिसरा नाड्यः तासां पद्धतिं मार्गं प्रसरणस्थानमित्यर्थः विशेषणस्य फलमाह तत इ
ति ततः हृदयात् भो अनंत तव धाम उपलब्धिस्थानं सुषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरः मूर्द्ध
८ नं प्रति उदगात् ऊर्ध्वं सर्पत् मूलाधारादारभ्य हृदयमध्यात् ब्रह्मरंध्रपर्यंतं गतमित्यर्थः कथंभूतं धाम यत्स
मेत्य प्राप्य पुनरिह कृतांतमुखे मृत्युमुखे संसारे न पतंति तथा च श्रुतिः शतं चैका च हृदयस्य
नाड्यः तासां मूर्द्धानमभिनिःसृतैका तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति उ १२०
दरादिषु यः पुंसां चिंतितो मुनिवर्त्मभिः हंति मृत्युभयं देवो हृद्गतं तमुपास्महे १८ ॥

तन्वीश्वरस्यापि तर्हि जीववदुदरहृदयादिसंबंधे तदनुप्रविष्टस्य च तारतम्ये सति केन विशेषेणोपास्यत्वमि
तीमामाशंकां परिहरंस्तयन् एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवा
सः साक्षी चेता केवलो निर्गुणश्चेत्याद्याः श्रुतयः स्तुवंतीत्याह स्वकृतविचित्रयोनिषु विशति स्वयंकृतास्व
उच्चनीचमध्यमासु योनिषु अभिव्यक्तिस्थानेषु कार्येषु देहादिषु तत्तया प्रागेव विद्यमानत्वेन मृदापे प्र
वेशासंभवाद्धि शन्निव वर्तमानस्तारतम्यतो न्यूनाधिकभावेन चकास्सि अवभाससे स्वकृता योनी
रत्नकरोतीति स्वकृतानकृतिः अनलवत् अग्निर्यथा स्वतस्तारतम्यहीनोपि काष्ठानुसारेण तथा

स्वकृतविचित्रयोनिषु विशन्निव हेततया तरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः अथ
वितथास्वमूष्ववितथं तव धाम समं विरजधियोन्वयंत्यभिविपण्यव एकरसम् १९ ॥

तथा प्रकाशते तद्वत् अथ अतो वितथासु मिथ्याभूतासु अमूषु योनिषु अवितथं सत्यं यतः सममवि
शेषं अतः सत्यं तव धाम स्वरूपं विरजधियो निर्मलमतयः अन्वयंति जानंति अनुरिति पृथक्पदं वा
अत्र हेतुः अभिविपण्यवः इति अभितो विगतः पण्यव्यवहाराः पण्यव्यवहारा अत्र पण्यरूपं पन्थुरितिपैह्लिकामु
ष्मिकफलेकर्मभिरहिता इत्यर्थः अविशेषत्वादेवैकरसं सन्मात्रं अतस्तवोपाधिकृततारतम्याभा
वादप्रश्रुतेश्च यस्योपास्यत्वमिति भावः स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितं सर्वानुस्यूतसन्मात्रं भ

न

भा॰द॰ अपिच कृतोऽस्त्वियमाशंकास्माद्भगवतो देहाद्युपाधिकृतदोषप्रसंग इति यतोऽविद्याकामकर्मभिः संसरतो जीव
उ॰ स्योपाधिभगवद्भावेऽलक्षणाद्वारा ब्रह्मत्वबोधयंत्यस्तदोषं निषेधयंति स यश्चायं पुरुषे यश्चासावादित्ये स एकः
११७ तत्त्वमसीत्याद्याः श्रुतयः ननु कृतार्थस्यात्मनः स्तुतिरियमीश्वरत्वेन क्रियते न तु तस्येश्वरत्वं बोध्यते नैत
द्युज्यते यतस्तत्र यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इत्याद्याः
ग श्रुतयः कृतावतारस्य भगवतश्चरणभजनमुपायं वदंतीत्याह स्वकृतपुरेष्विति स्वकर्मोपार्जितेषु पुरेषु देहेषु
अमीषु नरादिषु भोक्तृत्वेन वर्त्तमानं पुरुषं अखिलशक्तिधृतः सर्वशक्तेराश्रयस्य पूर्णस्य तवांशत्वांशः कृत

स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृ
तोंऽशकृतं इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेऽ
ङ्घ्रिमभवं भुवि विश्वसिताः २० ॥

इव कृतः त्वद्रूपं वदंतीत्यर्थः ननु कार्यकारणसंहतस्य कृतस्य एवं भूतत्वं तत्राह अबहिरंतरसंवरणमिति
ए बहिः कार्यमंतरं कारणं वस्तुतस्तदावरणशून्यं तयोरसत्त्वादित्यर्थः यत एवं नृगतिं जीवस्य गतिं तत्त्वं वि
विच्य विशोध्य कवयः अन्यथेदं न प्राप्यत इति जानंतः निगमावपनं निगमोक्तकर्मणामावपनं आसमंताद् ९
यस्मिन्निति आवपनं हेतुं सर्वकर्मार्पणविषयमित्यर्थः यत्रार्पितानि कर्माणि मुक्तिफलानि तं भवतोऽ ८
ङ्घ्रिमभवं भवनिवर्त्तकं विश्वसिताः कृतविश्वासाः उपासते अर्चनवंदनादिभिः सेवंते भुवीति मर्त्यलो
क इदमेवोचितमिति निदर्शयति त्वदंशस्य ममेश्वात्त्वन्मायाकृतबंधनं त्वदंघ्रिसेवामादिश्य परानंदं निवर्त ११४

भक्तिरल्पसाधनमितिवचनमनुचितमिवमन्वानोभक्तिंगुरूकरोति दुरवगमेति भोईश्वरदुर्बोधंयदा
त्मतत्त्वंतस्यनिगमायज्ञापनायात्तवान्ततनोराविःकृतमूर्तेः चरितमहामृताब्धिपरिवर्तपरिश्रमणाः
चरितमेवमहानमृताब्धिःतस्मिन्परिवर्तोविगाहस्तेनपरिश्रमणाःपरिवर्ज्जितार्थः श्रमणंश्रमः ग
तश्रमाइत्यर्थः अपवर्गमपिकेचिन्नपरिलषंतिनेच्छंतिकुतोऽन्यत् एवंभूताभक्तिरसिकाविरला
इतिदर्शयति नकेवलमन्यन्नेच्छंति किंतुतेनैवसुखेनपूर्णाःसंतःश्र्वंसिहंगृहादिश्रूपेदंतत्र

दुरवगमात्मतत्त्वनिगमायतवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः नपरिल
षंतिकेचिदपवर्गमपीश्वरतेचरणसरोजहंसकुलसंगविसृष्टगृहाः २१ ॥

त्याह तवचरणसरोजहंसकुलसंगविसृष्टगृहाइति तवचरणसरोजेहंसाइवरममाणायेभक्ता
स्तेषांकुलंतेनसंगस्तेनविसृष्टागृहायैस्तेतथा अनेनश्रवणकीर्तनेदर्शितेकृतिस्वभक्तेरण्याधिक्यं
भक्तेर्दर्शयति यथाह यःसर्वैर्देवानमतिमुमुक्षवोब्रह्मवादिनश्चेति व्याख्यातंचसर्वत्रैर्भाष्यकृद्भिःसु
कायपिलीलयाविसृष्टदेहास्त्वाभजन्नइति त्वत्कथामृतपाथोधौविहरंतोमहामुदः कुर्वंतिकृतिनःकेचि
कृति १

भा॰ द॰ आराममस्य पश्यंति न तं पश्यति कश्चन न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव नीहारेण प्रावृता जल्प्या
३॰ चासुतृप उक्थशासश्चरंतीत्याद्याः अतएव अनुक्रोशंत्यो जगदात्मनो ऽसुरेरनिम्नुपदिशंतीत्याहुः त्वदनुपथमि
११५ ति त्वदनुवर्तित्वे सेवापथिकमिदं कुलायं कोष्ठि वा लीयत इति कुलायं शरीरं आत्मसुहृत्प्रियवदात्मा च सु
हृच्च प्रियश्च तद्वच्चरति स्वाधीनतया वर्तत इत्यर्थः तथापि त्वयि उन्मुखे हिते प्रिय आत्मनि च अथार्थे चकारः
एवंभूते सुलभे सत्यपि त्वयि वत अहो केपि न रमंते किंतु न सत्यादिना भजंति असदुपासनया देहाद्युपलालनेन आ
त्महनः प्रमादिनः कुतः यदनुशयाः यस्याम् असदुपासनायां अनुशयो वासना येषां ते कुशरीरभृतः संतः
उरुभये संसारे भ्रमंति परिवर्तंते अत आत्महन इति भावः तथात्मनि जगन्नाथे मन्मनो रमतामिति कदा
ममेदृशं जन्म मानवं संभविष्यति २२ इदानीमात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्याद्याः

त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरति तथोन्मुखे त्वयि हिते प्रिय आत्मनि च न बत रमंत्य
हो असदुपासनयात्महनो यदनुशया भ्रमंत्युरुभये कुशरीरभृतः २२ निभृतमरुन्मनोक्षदृढयो
गयुजो हृदि यन्मुनय उपासते तदरयोपि ययुः स्मरणात् स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो व
यमपि ते समाः समदृशोंघ्रिसरोजसुधाः २३ ॥ अतएवोपासनं मंगलत्वेनोपदिशंतीत्याहुः निभृतमरुन्म

नोक्षदृढयोगयुज इति मरुत्प्राणः मनश्च अक्षाणींद्रियाणि च निभृतानि संयमितानि यैस्ते च दृढयोगं
युंजंतीति दृढयोगयुजस्ते तथाभूता मुनयो हृदि यत्तत्त्वमुपासते तदरयोपि स्मरणाद्ययुः प्रापुः स्त्रियोपि
कामतः उरगेंद्रभोगभुजदंडविषक्तधियः अहींद्रदेहसदृशयोर्भुजदंडयोर्विषक्ता धीर्याभिस्ताः परि
च्छिन्नदृष्टयः समदृशः सममपरिच्छिन्नं त्वां पश्यंत्यो वयं श्रुत्यभिमानिन्यो देवता अपि ते समा एव कृपावि
षयतया अंघ्रिसरोजसुधाः अंघ्रिसरोजे सुधां मधु पास्यंत्यः अयं भावः इत्थंभूतस्तव स्मरणानुभावः ये योगि
नस्त्वां हृद्यालंबनमुपासते याश्च वयं त्वां समं पश्यामः याश्च स्त्रियः कामतः परिच्छिन्नं ध्यायंति ये च द्वे
षिणः सर्वानपि तांस्त्वमेव प्रापयसीति चरणस्मरणं प्रेम्णा तव देव सुदुर्लभं यथाकथंचिन्नृहरे ममभू ॥ [illegible] ३६

यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह कोअद्धावेदकइहप्रावोचत् कुतआयातःकुतइयंविसृष्टिःअर्वा
कुदेवाअस्यविसर्ज्जनेनतथाकोवेदयतआविर्बभूवअनेजदेकंमनसोजवीयोनैनंदेवाआप्नुवन्पूर्वम
र्षत् तद्धावतोन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधातीत्याद्या श्रुतयः भगवतस्त्वदुर्ज्ञेयत्वे
स्वोभक्तिमेवोररीकुर्वतीत्याह कइहनवेदेति वतअहोभगवन्इहजगतिअयसरेशूर्वसिहंत्वा अ
ल वरजन्मयः अर्वाचीनोत्पत्तिनाशवान्कोनुप्रमान्वेदजानाति ईश्वरस्यशर्वसिद्धावन्यस्यचार्वाची
नत्वेप्रमाणंवदन्ज्ञानकारणाभावमाह यतउदगादिति यतःत्वत्तःऋषिर्ब्रह्माउत्पन्नःयंब्रह्माणमनु
उभयअध्यात्मिकाधिदैविकादेवगणाउत्पन्नाः ततोअर्वाचीनासर्वेचतद्विधभूतग्रामाअपउत्पादयो

कइहनुवेदवतावरजन्मलयोग्रसरंयतउदगादृषिर्यमनुदेवगणाउभये तर्हिनसन्नचासदुभ
यंनचकालजवःकिमपिनतत्रशास्त्रमवकृष्यशयीतयदा २४ ॥

यदात्तभवान्सर्वममकृष्यउपसंहृत्यशयीत तर्हितदाअनुशायिनोजीवानांज्ञानसाधनेनास्ति यत
त स्तदानसत्स्थूलंआकाशादिनचासत्सूक्ष्मंमहदादिनचउभयंसदसद्भ्यामारब्धंशरीरंनचकालजवः
तन्निमित्तभूतकालवैषम्यंएवंसतितत्रतदानकिमपिइंद्रियप्राणाद्यपिनचज्ञापकंशास्त्रमपि अय
मभिप्रायःअर्वाक्सृष्टिगतानांदेहाद्युपाधिकृतांतःकरणकालवशेनचमलिनसत्वानांनतावत्भ
गवत्ज्ञानसंभवः तथाचश्रुतिः नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूवेत्याद्याः यदात्त
प्रलयसमयेनवद्धतरमस्तितदापिसाधनाभावान्नभगवत्ज्ञानं अतःसाधनसद्भावकालेत्वदेक
शरणतयाश्रवणकीर्तनादिभक्तिरेवसकरेतिकाइहेत्याद्युदिसंग्रहः क्वचभूम्नमहत्स्तव दीनवंयोद

भा·द·
३·
११६

इतोपिनष्टानेवंकुर्वंउपदिशतामपिभ्रमबाहुल्यादित्याह जनिमसतइति असतोजगतोजनिमुत्पत्तिंयेवैशे
षिकादयोवदंति असतएवब्रह्मत्वस्योत्पत्तिंयेचपातंजलादयः सतएवैकविंशतिप्रकारस्यदुःखस्यना
शंमोक्षंवदंतियेनैयायिकाः उतअपिचसांख्यादयः आत्मनिभिदांभेदंवदंति येचमीमांसकाःविपणं
कर्मफलव्यवहारमृतंसत्यंस्मरंतिवदंति तेचसर्वेआरुपितैर्गुणैरपितैर्भ्रमैरेवोपदिशंतिनतत्त्वदृष्ट्यासदेव
सौम्येदमग्रआसीत् ब्रह्मैवसन्ब्रह्माप्येति अनीशयाशोचतिमुह्यमानः अविद्यायामंतरेवर्तमानाःस्वयं
धीराःपंडितंमन्यमानाःदंद्रम्यमाणाःपरियंतिमूढाः अंधेनैवनीयमानायथांधाः एकमेवाद्वितीयंब्रह्म ए

जनिमसतःसतोमृतिमुतात्मनियेचभिदांविपणमृतंस्मरंत्युपदिशंतित
आरुपितैः त्रिगुणमयःपुमानितिभिदायदबोधकृतात्वयिनततःपरत्र
सभवेदवबोधरसे २५ ॥

कथाबहुधाचैवदर्शनमित्यादिश्रुतिविरोधात् किंचवस्तुतःपुरुषस्यत्रिगुणमयत्वेसर्वमिदंसंगच्छेतनन
ततदृश्योत्याह त्रिगुणमयःपुमानितिभिदायदबोधकृतात्वयीतित्रिगुणमयःपुमानित्यनेनदेहेनतादा
भिदाउपलक्षणमेतद्विदादिसायस्मात्त्वयिविषयेअबोधकृतात्वद्विषयाज्ञानविजृंभितातर्हिकिमज्ञानस्य
स्तिवस्तुतःपुंसिनैवेत्याह ततःअबोधात्परत्रपरेऽसंगेऽवबोधरसेज्ञानघनेसअबोधोनभवेत् नसं
भवतीत्यर्थः मिथ्यातर्कसुकर्कशेरितमहावादांधकारांतरभ्राम्यन्मंदमतेरमंदमहिमन्त्वज्ज्ञानवर्त्मा
स्फुटं श्रीमन्माधववामनत्रिनयनश्रीशंकरश्रीपतेगोविंदेतिमुदावदन्मधुपतेमुक्तःकदास्यामहम्

ननु यद्यसन्नोत्पद्यते यदि च त्रिगुणमयः पुरुषो न भवति तर्हीदं प्रपंचजातं पुरुषशृंगवदत्यंतमसत्कं
स्यात् कथं तर्हि तयोः सत्वेन प्रतीतिरत आह सदिवमनस्त्रिवृदिति मनः मनोमात्रविलसितमिदं त्रिवृत्त्रि
गुणात्मकं प्रपंचजातमसदेव सदिव विभाति कथमिति चेत् तत्राह त्वयीति त्वय्यधिष्ठाने अधि
ष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः न केवलमिदं कारणरूपं किंतु आमनुजात् मनुजः पुरुषः अ
वा भिविधा[illegible]कारः पुरुषमभिव्याप्येति पुरुषस्यापि पृथक् सत्वप्रतीतिर्मायामात्रविलसितेत्यर्थः
तथा च श्रुतिः असतोधिमनोसृज्यत मनः प्रजापतिमसृजत प्रजापतिः प्रजा असृजत तद्वा इदं मन
स्येव परमं प्रतिष्ठितं यदिदं किंचेति नन्वात्मविदामपि विश्वं सदेव स्फुरति अतः कथमसत्त्वमाह

सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः न
हि विकृतिं त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितम् २९

तत्राह सदभिमृशंतीति आत्मविदस्त्वशेषमिदं भोक्तृभोग्यात्मकं विश्वमात्मतयैव सदभिमृ
शंति सदिति जानंतीति आत्मकार्यत्वान्न पृथगित्यर्थः तथाहि यदुपादानकं यत्कार्यं भवति तत्ते
नैव रूपेण प्रतीयते उपादीयते चेति लोकाचारेण दर्शयति नहि विकृतिमिति कनकस्य विकृतिं
कुंडलादिकं कनकार्थिनो न हि त्यजंति अत्र हेतुः तदात्मतया कनकरूपत्वेनेत्यर्थः अतः स्वकृतमि
दं विश्वमनुप्रविष्टं च पुरुषरूपमात्मतयैवावसितं निश्चितं यस्मात्त्वत्तः सदा भाति जगदेतदसत्स्वतः
सदाभासमसत्यस्मिन्भगवंतं भजाम तत् २९

भा॰ द॰ ३॰ २७

कि

नन्वसत्यं ज्ञानमनंतं ब्रह्म नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति इत्यादिश्रुतिभिरे
वंभूतस्य भगवतः प्रतिपादनात् तज्ज्ञानं स्वरूपमेवेति कृतं भक्त्या अत आह तव परि ये चरंतीति तवेति कर्म
णि षष्ठी त्वां ये परिचरंति छंदसि व्यवहिताश्चेति यच्छब्देन व्यवधानमदोषः केन रूपेण अखिलसत्वनिकेत
तया अखिलानि सत्वानि निकेतो यस्यास्तया तस्य भावस्तत्ता तया सर्वभूतावासतयेत्यर्थः उत एव विगण
य्य तिरस्कृत्य एव निर्ऋतेर्मृत्योः शिरः सहीनपदापादेन आक्रमंति मृत्योर्मूर्ध्नि पदं दधतीति ते न रतिमच्छं
तरित्यर्थः ये पुनर्विमुखा अभक्ताः तान् राया वाचा पशूनिव विबुधानिंद्रादीनपि परिवयसे बध्नासि ततः त्व
यि कृतसौहृदाः त्वयि कृतं सौहृदं प्रेम यैः ते केवलं निष्प्रुते पुनंति पवित्रयंति आत्मानमन्यानपीति शेषः ने

तव परि ये चरंत्यखिलसत्वनिकेततया त उत पदाक्रमंत्यविगणय्य शिरो निर्ऋतेः परिवयसे पशू
निव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमुखाः २२

तरे तथा च श्रुतिः त
स्य वाक्तंतिर्नामानि दामानि तदस्येदं वाचा तंत्या नामभिर्दामभिः सर्वं सितमित्ययमभिप्रायः सत्यमेवंभू
तमात्मानं श्रुतयः प्रतिपादयंति तत्र च यद्यपि वस्तुनोऽपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते तथापि संभा
वनातिरस्कृतत्वान्मलिनचित्तेषु परोक्षमिव भवतीति नापरोक्षं संसारध्वंसमनिवृत्तिसमर्थं भगवत्परि
चर्यया तु सम्यगमलचित्तानां तत्प्रसादेन लब्धापरोक्षज्ञानानामयत्नत एव करकलितो मोक्ष इति
तथा च श्रुतयः देहांते देवः परं ब्रह्म तारकं व्याचष्टे यमेवैष वृणुते तेन लभ्यः यस्य देवे परा भक्तिरि
त्यादयः तपं तन्नायैः प्रपतं तत्पर्वताग्रे इत्तीर्थानि पदं तत्र चागमान् यज्ञं तु यागैर्विवदंत योगैर्हरिं वि

ननु यद्यखिलसत्वनिकेतत्वेन भगवतः सेव्यत्वमुच्यते तर्हि तत्करणसंबंधात्कर्तृत्वभोक्तृत्वे प्रसज्येयातां
न वस्तुतस्तथात्वमिति चेत्तर्हि जीवानामपि तत्तुल्यमिति केन विशेषेण पुनः सेव्यसेवकत्वमित्यामा
शंकां परिहरंतः अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति विश्वं न च तस्य
वेत्ता तमाहुरग्र्यं पुरुषं महांतमित्याद्याः श्रुतयः स्तुवंतीत्याह त्वमकरण इति करणसंबंधरहित ए
वाखिलकारकशक्तिधरः अखिलानां प्राणिनां यानि कारकाणींद्रियाणि तेषां शक्तीर्धारयति प्र
वर्तयतीति तथा कुतः स्वराट् यतः स्वेनैव राजसे दीप्यसे न हि स्वतः सिद्धज्ञानशक्तेरिंद्रियापे
क्षेत्यर्थः अतस्तव बलिमुद्वहंति पूजां कुर्वंति अजया अविद्यया सहितास्तया वृता इत्यर्थः अनि

त्वमकरणः स्वराडखिलकारकशक्तिधरः तव बलिमुद्वहंति समदंत्यजयानिमिषाः व
र्षभुजोखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः २८ ॥

मिषा देवा ब्रह्मादयः तत्र ब्रह्मा विश्वसृजो वस्वादयोपि यथा सस्त्रीकाप्यवकिंकराः स्वामिनं सेवंते तथा
विद्यायुक्ता देवादयस्त्वामेवेति लोकोक्तिः समदंति च मनुष्यैर्दत्तं हव्यकव्यादिलक्षणं बलिं भक्षयं
ति अत्र दृष्टांतः वर्षभुजोखिलक्षितिपतेरिति यथा वर्षभुजः खंडमंडलपतयोखिलक्षितिपतेर्मह
मंडलेश्वरस्य स्वप्रजादत्तबलिभुजो बलिमुद्वहंति तद्वदिति कथं बलिं वहंति तदाह विदधति यत्र ये
त्वधिकृता भवतश्चकिता इति ततो भीताः संतो यस्मिन्कर्मणि येन नियुक्तास्तत्कुर्वंतीति तदाज्ञापा
लनमेव बलिवहनमित्यर्थः तथा च श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्नि
श्चेंद्रश्च मृत्युर्धावति पंचम इति अनिंद्रियोपि यो देवः सर्वकारकशक्तिधृक् सर्वज्ञः सर्वकर्ता च सर्व

[illegible] म २५

भा॰
द॰ ३॰
११८

तद्देवं करणप्रवर्तकमीश्वरं करणपरतंत्रा नरा भजंतीत्युक्तं न केवलमियद्देवकारणं ततउत्पन्नत्वेनापि
तत्परतंत्रत्वादिति वदंति यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे
लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरंतीत्यादिश्रुतयः इत्याह स्थिरचरजातय
इति हे विमुक्त नित्यमुक्त यदि तवाऽजया मायया विहरः विहारः क्रीडा भवति तदा स्थिरचरजातयः।
स्थिराश्च चराश्च जातयः जात्यालिंगिता देहा येषां ते जीवाः स्युः भवेयुः कथंभूतस्य ततः जातः परस्य हे देव
र्तमानस्यासंगस्येत्यर्थः कथं विहारः उदीक्षया ईक्षणलेशेन ननु मयि लीनानां कथं जन्म स्यात्तत्राह
उत्थनिमित्तयुज इति ईक्षयैव उत्थिता आविर्भूतानि निमित्तानि कर्माणि तद्युक्तानि लिंगशरीरा।

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्त ततः। न हि
परमस्य कश्चिदपरो न परश्च भवेद्वियत इवापदस्य तव शून्यतुलां दधतः २८ ॥ ॥

णि वा तैर्युज्यंत इति ते तथा ननु किं निमित्तोस्यानेन मदीक्षयैव भवंतु न तथा वैषम्याभावाद्विषमसृ
ष्टेरयोगादित्याह परमस्येति तव परमस्य उत्तमस्य परकारुणिकस्य वियत इव आकाशसदृ
स्य समस्येत्यर्थः कश्चिदपरः स्वीयः परोऽस्वीयश्च न भवेन्न संभवतीत्यर्थः ब्रह्म वा इदमग्र आसीत्ततो
वै सदजायतेत्यादिश्रुत्यात्मन एवैकत्वमिव प्रतीयते तदर्थं पुनर्विशिनष्टि शून्यतुलां दधतः शून्य
साम्यं भजतः वस्तुतस्तु शून्यस्यापि स्फोरकत्वेन साधकस्येत्यर्थः तदेव दर्शयितुं पुनर्विशिन
ष्टि अपदस्येति न पद्यते ज्ञायते इत्यपदः तस्य वाङ्मनसोरगोचरस्येत्यर्थः त्वदीक्षणवशात्क्षो
भमायया बोधितकर्मभिः जातान्संसरतः विज्ञानन्नृहरे पाहि नः पितः २९ ॥ ॥ ::

एवं तावत्परमात्मनः सकाशादविद्याकृतकार्योपाधयस्तदंशा एव जीवा जाताः संसरंतो भजंतीत्यु
क्तं तत्र यद्येकाविद्या तदा जीवस्याप्येकत्वादेकमुक्तौ सर्वमुक्तिप्रसंगः अथ नानाविद्यास्तर्हि तत्संबं
धांतरेण संसारानपगमादनिर्मोक्ष इत्यादितर्कबलेन वस्तुत एव नानात्मानः नानाजीवाः तत्र च ते
षामणुत्वे देहव्यापि चैतन्यं न स्यात् देहपरिमाणत्वे च मध्यमपरिमाणानां सावयवत्वेनानित्य
त्वं स्यादतः सर्वगता नित्याश्चेति केचन मन्यंते तत्र न तावदुक्तदोषप्रसंगः अविद्याभेदेन तत्तच्छ

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि
न शास्यतेति नियमो ध्रुव नेतरथा ॥ ॥

क्तिभेदेन वा बद्धमुक्तव्यवस्थासंभवादीश्वरस्य तु न केनाप्यंशेन संसारशंकेत्युक्तमेव इति प्रसिद्धं चा
त्मैकं सर्वश्रुतिषु किंचेमं पक्षमंतर्यामिब्राह्मणोऽपि न सहत इत्याह अपरिमिता इति अपरिमि
ता वस्तुत एवानंता ध्रुवास्तेनैव रूपेण नित्याः सर्वगताश्च तनुभृतो जीवा यदि स्युः तर्हि तेषां
समत्वात् शास्यता न घटते इति कृत्वा हे ध्रुव नियमो नियमनं त्वया न स्यादितरथा न घटेत ॥

रूपं

भा॰ कथंयन्मयंउपाधितोयद्विकारमायंयज्जीवात्वंअजनिजातंततस्यस्वविकारस्यनियंतृनियाम
२३॰ कंभवेत् अविमुच्यकारणेनतथाअपरित्यज्यकिंतत्समंअनुस्मृतं ननुकिंयत्तच्छैश्लीयतेवेउ
११६ च्यतोइदंतदित्यतआह अनुजानंतोयदमतमितिजानीमइतिवदंतोयदमतमविज्ञातमायंअ
विषयत्वात्तथाचश्रुतिः यस्यामतंतस्यमतंमतंयस्यनवेदसः अविज्ञातंविजानतोविज्ञातमवि

अजनिचयन्मयंतदविमुच्यनियंतृभवेत्समम
नुजानतांयदमतंमतदुष्टतया ३० ॥ ॥

जानतां अवचनेनैवमोवाचसहत्वंसीवभूवेत्यादिकिंच मतस्यज्ञातस्यदुष्टतयादोषश्रव
णात् तथाचश्रुतिः यदिमन्यसेसुवेदेतिदहमेवापिनूनंत्वंवेत्थब्रह्मणोरूपंयदस्यत्वंयद
स्यदेवेष्वित्यादि तस्मायत्ततशास्त्रावबोधात्ममतकं किमपिसर्वानुस्मृततत्वेनसमंनियंतृभवेदि
त्यर्थः अंतर्यंतासर्वलोकस्यगीतः श्रुत्यायुक्त्याचैवमेवावसेयः यःसर्वज्ञःसर्वशक्तिर्न्हेसिं
हः श्रीमंतंतंचेतसेवाःवलंबे ३० ॥ ॥

ननु च यदि परमात्मनो जीवा जायंत इति नियंतृनियम्यभाव उच्यते तथा सति जीवानामनित्यत्वप्रसं
गेन प्रतिदिनं कृतनाशाकृताभ्यागमप्रसंगः स्यात् किंच तदा मोक्षे नामजीवस्य स्वरूपहानिरेव
स्यान्नचैतद्युक्तं स्वप्रकाशानंदात्मनो विद्याकृतानर्थनिवृत्तिमात्रस्य मोक्षत्वाभ्युपगमादित्याशंक्योपा।
धिजन्मनैव जन्म जीवानामुच्यते न स्वतो घटनादित्याह नघटत इति तत्र किं प्रकृतेर्जीवरूपेणोद्भवः स्या
प्रकृतेर्जडत्वात् त्पुरुषस्य वा उभयोर्वा आद्ये जीवानां जडत्वापत्तिः द्वितीये पुरुषस्य विकारित्वप्रसंगः अत एव न तृतीय द्वयोरजत्वात् ५
इत्याशयेनोक्तं प्रकृतिपुरुषयोरुद्भवो न घटत इति श्रुत्याः अजत्वप्रतिपादनादपीत्याह अजयोरिति तथा च
श्रुतिः अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपां। अजो ह्येको जुषमाणोनुशेते जहात्येनां

मो नघटत उद्भवः प्रकृतिपूरुषयोरजयोः उभययुजा भवंत्यसुभृतो जलबुद्बुदवत् ॥ ॥

भुक्तभोगामजोन्य इति उभययुजा तु भवंति उभयं च तद्युक् च इति युक् संबद्धं परस्पराध्यस्तमिति यावत्ते
नासुभृतः प्राणाद्युपाधयो जीवा जायंत इत्यर्थः जलबुद्बुदवदिति यथा केवलेनानिलेन वा जलेन वा
बुद्बुदा न भवंति किंतु मिलिताभ्यां तद्वत् तत्र च यथानिलो निमित्तं जलमुपादानं एवमत्रापि प्रकृतिः।
निमित्तं पुरुष उपादानं तस्माद्वा एतस्मादात्मन आकाशः संभूतः सो कामयत बहु स्यां प्रजायेयेति य
थाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भू
तानि सर्व एत आत्मनो व्युच्चरंतीत्यादिश्रुतिषु चेतनाचेतनप्रपंचस्य परमात्मोपादानकत्वश्रवणा
त्त्वं च विकारित्वं परिणामानंगीकारात् केचित्तु नः परिणाममंगीकृत्यात्मनो विकारभिया विपरी
तं निमित्तोपादानभावमिच्छंति सर्वं तावत् प्रकृतिपुरुषैक्यादुद्भवंतीति सिद्धम् ॥ ॥

भा॰ तदेवमेकमेवाद्वितीयंब्रह्म अजामेकांअविनाशीवाअरेयमात्मेत्यादिश्रुतिवलाडत्पत्तिश्रवणाच्च
८.३. जीवानामौपाधिकमेवजन्मनवस्तुतइत्युक्तंउपाधिलयेनपरमात्मनिपुनर्लयश्रवणादपिनवा
१२० स्तवंजन्मेत्याह त्वयितइति त्वयिकारणात्मनितइमेजीवाःततइति यतोनवास्तवंजन्मतस्माद्वि
विधनामगुणैरनेकप्रकारकार्योपाधिभिःसहलिप्ताःलीनावभूवुः तत्रसुप्तिप्रलययोर्मधुन्यशे
षरसाइवलीयंतेयथामधुनिसकलकुसुमरसाविशेषतोऽनुपलभ्यमानाअपिसामान्येनोपल
भ्यंते एवंसुप्यादौविशेषमात्रलयात्कारणस्यविद्यमानत्वात्सामान्यतोवर्तंते मुक्तौतुकारणस्या
पिलयात्त्वयिपरमेनिरुपाधौसरितइवार्णवेलीयंतइतिविवेकः तथाचश्रुतयः यथासो

त्वयितइमेततोविविधनामगुणैः परमेसरितइवार्णवेमधुनिलिल्युरशेषरसाः ३१

म्यमधुमधुकृतोनिस्तिष्ठंतिनानात्ययानांवृक्षाणांरसान्समवहारमेकतांरसंगमयंति तेरसा
यथानविवेकंलभंतेअमुष्याहंवृक्षस्यरसोस्म्यमुष्याहंवृक्षस्यरसोस्मीत्येवमेवखलुसौम्येमाः
सर्वाःप्रजाःसतिसंपद्यनविदुःसतिसंपद्यामहइति यथानद्यःस्यंदमानाःसमुद्रेस्तंगच्छंति
नामरूपेविहाय तथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यमित्याद्याः यस्मिन्नु
द्यद्विलयमपियज्ञातिविश्रृंखलयादौजीवोपैतंगुरुकरुणयाकेवलात्मावबोधे अत्यंतां
तंव्रजतिसहसासिंधुवत्सिंधुमध्येमध्येचित्तंत्रिभुवनगुरुंभावयेतंनृसिंहम ३१ ॥ ॥

एवंतावत्परमेश्वराज्जीवाजायंतेतद्दर्शनेनचकर्माणिकुर्वंतिपुनस्तत्रलीयंतइतिसंसारचक्रभ्रमणमुक्तं
इदानींतन्निवृत्तयेपरीत्यभूतानिपरीत्यलोकान्परीत्यसर्वाःप्रदिशोदिशश्च उपस्थायप्रथमजामृतस्या
त्मनात्मानमभिसंनिवेशेत्यायाभगवदनुवृत्तिंविदधतीत्याह एषतवेति एषजीवेषुःमीशतवमाय
याभ्रममुक्तलक्षणमवगत्यज्ञात्वास्वधियः भृशंतत्वयिप्रभवेभवनिवर्त्तकेभावंस्वभावमनुवृत्तिंद
धतिकुर्वतीति अनुप्रभवंअनु प्रभवोयस्मिंस्तंप्रभंततःकिमतआह कथमिति अनुवर्त्ततामनु

एषतवमाययाभ्रममममीशः वगत्यभृशंत्वयिस्वधियोऽभवेद्धतिभावमनुप्रभवम् कथ
मनुवर्ततांभवभयंतवयद्भ्रुकुटिःसृजतिमुहुस्त्रिणेमिरभवच्छरणेषुभयम् २२ ॥ ॥

वर्तमानानांत्वामेवशरणंभजतांभवभयंकथंभवेन्नकथंचिदपीत्यर्थः कुतःयद्यस्मात्तवभ्रुकुटिःभ्रु
भंगरूपस्त्रिणेमिस्त्रिस्थानेमयउवाचक्रेद्धाःशीतोष्णवर्षकालायस्यसंवत्सरात्मकस्यकालस्यसः
अभवच्छरणेषुनभवांच्छरणंरक्षितायेषांतेष्वेवभयंजन्ममरणादिलक्षणंसृजतिकरोतिअत
एवंभूतेसंसारमाकलय्यतन्निवृत्तयेस्वधियस्त्वयिभावंदधतीति संसारचक्रक्रकचेविदीर्णमु
दीर्णनानाभवतापतप्तं कथंचिदापन्नमिहप्रपन्नंत्वामुद्धरश्रीनृहरेनृलोकम् ३२ ॥ ॥

भा० १०.३ ४२ ॥

सच भगवति भावो मनो नियमे सति भवति सोपि गुरूपसदनादिति गुरूपसदनं विदधति तद्विज्ञाना
र्थं गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं आचार्यवान्पुरुषो वेद नैषा तर्केण मतिरपने
या प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्याद्याः श्रुतयस्तत्राह विजितहृषीकवायुभिरिति विजितानि हृषी
काणींद्रियाणि वायुः प्राणो यैः तैरपि अदांतमनस्तुरगमदांतमदमितं मन एव तुरगः इदं मत्तु साम्या
त्तत्ते ये यंतु नियंतुं यतंति प्रयतते अतिलोलमतिचंचलं गुरोश्चरणं समवहाय अनाश्रित्य ते उपा
येऽधिवियंते क्लिश्यंतीत्युपायखिदः संतः व्यसनशतान्विताः बहुव्यसनाकुलाः इह संसारसमुद्रे सं मु

विजितहृषीकवायुभिरदांतमनस्तुरगं य इह यतंति यंतुमतिलोलमुपायखिदः व्यसन
शतान्विताः समवहाय गुरोश्चरणं वणिज इवाज संत्यकृतकर्णधरा जलधौ ३३ ॥

तितिष्ठंतीड्यः त्वमेव प्राप्नुवंतीत्यर्थः हे अज अकृतकर्णधरा अस्वीकृतनाविका वणिजो यथा तद्व
